साक्षादप्यविरोधं जैमिनिः १।२।२९।

अग्निशब्दस्य वैश्वानरशब्दसामानाधिकरण्येनाग्निशरीरकपरमात्म परत्वमस्तीत्युक्तम् । परन्तु परमात्माभिधायिवैश्वानरशब्दसामानाधिकरण्यमनपेक्ष्याप्यग्रनयनादियोगेन वैश्वानरशब्दवदग्निशब्दोऽपि साक्षादेव परमात्मन्यविरुद्ध इति जैमिनिराचार्यो मन्यते ॥२९॥

विवरणम्—इतः पूर्वप्रकरणे अग्निशब्दवैश्वानरशब्दयोश्चसामानाधिकरण्यं प्रदर्श्य सामान्यशब्दविशेषाद्यनेककारणप्रतिपादनद्वारा वैश्वानरशब्दः परमात्मन एव बोधको भवतीति शक्तिलक्षणवृत्तिद्वारेणेति प्रतिपादितम् । इतः परं याचकादिपदवत् योगार्थमाश्रित्यापि वैश्वानरशब्दपरमात्मानमेव बोधयतीति प्रदर्शयितुं तदर्थमाचार्यान्तरस्य संमतिं प्रदर्शयितुमग्रिमसूत्रमवतारयति 'अग्निशब्दस्येत्यादि । अग्निशब्दं समवाप्य वैश्वानरशब्देन सह सामानाधिकरण्यम् ततश्चाग्निशरीरकस्य परमात्मनो वाचक इति वह्निशरीरकः परमात्मैवात्रोपास्यतया गृह्यते नतु भूताग्निरिति समर्थितवान् । परन्तु अग्निशब्दो यदि परमात्मवाचकस्तदा वैश्वानरशब्दस्य सामानाधिकरण्यंनापेक्षते—तदापि

सारबोधिनी—इसके पहिले सामान्य विशेष शब्दादि हेतुओं के द्वारा वैश्वानर शब्द परम पुरुष परमात्मा का ही वाचक है नतु जाठराग्नि अथवा तेजोभिमानी देवता का वाचक है। इस बात का समर्थन श्रुति स्मृति युक्ति द्वारा किया गया है। इसके बाद जिस तरह पाचकादि पद योगार्थ द्वारा वाचक होता है। उसी तरह यह वैश्वानर पद भी पदार्थ शक्ति को लेकरके साक्षादेव परमात्मा का ही वाचक है। नतु परम्परया परमात्मा का वाचक। जिस तरह सर्वेश्वरादि पद परमात्मा का वाचक होता है, इस बात को बतलाने के लिए अन्य आचार्य की संमति पूर्वक विवेचन करते हुये यह उपक्रम करते है="अग्नि शब्दस्य" इत्यादि वृत्तिः। अग्नि शब्द वैश्वानराग्नि शब्द का सामानाधिकरण्य के बल से अग्नि है शरीर जिसका—एतादृश

अग्रे नयति इत्यग्निरित्याकारकयोगार्थवलेन यथा वैश्वानरशब्दः साक्षादेव परमात्मानं बोधयति तथैवायमग्निशब्दोपि साक्षादेव तत्त्वं बोधयत्येव तत्र कोऽपि विरोधो न भवतीति जैमिन्याचार्यस्य मतमिति।

तदयमत्राभिप्रायः। यथा विश्वश्चासौ नरश्चेति विश्वानरः सर्वात्मकः। अथवा विशेषां सर्वेषां प्राणिनां नरो नेता इति विश्वानरः। अथवा विश्वेसर्वेनरः प्राणिनः नियम्या यस्य विश्वानरः सर्वेषां जीवानां नियमन कर्त्ता यो भवति स विश्वानरः। अत्र संज्ञार्थात्वबोधकनरशब्देपरे पूर्वपदस्य दीर्घो भवतीत्यर्थकेन "नरे संज्ञायाम्" इति पाणिनीय सूत्रेण दीर्घो भवति. ततश्च विश्वानरः शब्दसिद्धिः अनन्तरं विश्वानर एव वैश्वानरः स्वार्थिकस्तद्धितोऽण् प्रत्ययः। अर्थात् अत्र प्रकृत्यर्थो भिन्नः प्रत्ययार्थश्चभिन्न इति न किन्तु यश्चार्थः प्रकृतेर्न ततोधिकोऽर्थः प्रत्ययस्य. यथा 'वय एव वायसः, "यथा वा देव एव देवता" इत्यादौ समानार्थक एव प्रत्ययः प्रकृतिश्च तथैव वैश्वानरेपीति। एवञ्च वैश्वानरशब्दो यथा योगार्थमादाय साक्षादेव परमात्मनो भवति वाचकस्तथैव, अग्निशब्दोऽपि योगार्थमादाय परमात्मनः

परमात्मा का बोधक है। ऐसा पूर्व सूत्रों में प्रतिपादन किया गया है। [जैसे नील पद घट के साथ समनाधिकरण हो करके, "नीलोघटः" यहाँ नीलाभिन्न घट का बोधक होता है। नतु पीत पटादिक का बोधक। इसी तरह प्रकृत में वैश्वानर का सामानाधिकरण्य को प्राप्त करके अग्नि शब्द भी अग्नि शरीरक परमात्मा को समझाता है "नीलमुत्पलम्" के समान] परन्तु परमात्मा का वाचक जो वैश्वानर शब्द है तादृश शब्द का सामानाधिकरण्य के अपेक्षा सहकार के बिना भी "अग्रे नयति इत्यग्निः" इत्यवयव के बल से; जिस तरह वैश्वानर पद इतरानपेक्ष हो करके साक्षादेव परमात्मा का वाचक है। उसी तरह से अग्नि शब्द भी इतरानपेक्ष होता हुआ साक्षादेव बोधक होकर अविरुद्ध है। इस तरह से जैमिनि नामक आचार्यविशेष की मान्यता

साक्षादेव वाचको भवति । तथाहि हृदयपुण्डरीके समुपास्यता रूपेण अङ्गति गच्छति आविर्भवति यः सः अग्निः परमात्मा परमात्मन एव हृदयपुण्डरीके उपास्यत्वस्य छांदोग्यादावति प्रसिद्धत्वात् । अथवा अङ्गयति प्रापयति स्थावरजङ्गमसाधारणस्य, उत्पत्तिस्थितिविलयं यः सोऽग्निः परमात्मा "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभि संविशन्ति" इत्यादिश्रुत्या परमात्मनः परमपुरुषस्यैव सर्वजगत्प्रति समुत्पत्यादिनियामकत्वस्य प्रतिपादनात् । इत्याद्यवयवार्थमादायाग्निशब्दः स्वरसतः परमात्मानमेव बोधयति विनैवाग्निशरीरकत्वकल्पनामिति मुखत एवाग्निशब्दः परमात्मवाचकतामङ्गीकरोति । अथवा सर्वस्य विकारजातस्य अग्रे नयतीति–अग्निः "सपर्यगात् शुक्रमकायमव्रणम्" इत्यादिना परमात्मनः सर्वव्यापकत्वात्सर्वेभ्यः पूर्ववर्ती यः स एवाग्निरिति । इत्थं चाग्निशब्दः परमात्मानमेव साक्षाद् बोधयतीति जैमिनि मुनोनामभिप्रायः । ततश्च "अथाग्नि वैश्वानरः" इत्यनुरोधेन न जाठरस्य तदभिमानिदेवस्य-

है। जो कि प्रकृतार्थ का उपोद्वलक है अर्थात् जिस तरह वैश्वानर शब्द विश्व समस्त नर स्वरूप वैश्वानर हैं । सर्वात्मक परमात्मा अथवा समस्त प्राणियों का नर अर्थात् नेता को विश्वानर कहते हैं। अथवा सर्व प्राणी नियम्य है जिसका उसको विश्वानर कहते हैं, सर्व नियन्ता परमात्मा । विश्वानर को ही वैश्वानर कहते हैं। यहाँ स्वार्थिक अण् प्रत्यय करके तथा, "नरे संज्ञायाम" इस सूत्र से दीर्घ करके वैश्वानर पद बनता है। जो परमात्मा बोधक है। इसी तरह अग्नि शब्द का योगार्थ होता है। उपासक के हृदयस्थल में आविर्भूत जो हो उसको अग्नि कहते हैं। एतादृश अग्नि पदवाच्य परमात्मा है। वेही शालिग्राम में विष्णु के समान उपासक के अन्तःकरण में आविर्भूत होते हैं। इसलिए अग्नि पदवाच्य परमात्मा हैं। अथवा प्राणी मात्र के उत्पत्ति स्थिति विनाशक जो हो उसका नाम है अग्नि । सर्वनियामक

अभिव्यक्तेरित्याश्मरथ्यः ।१।२।३०।

अपरिच्छिन्नस्यापि परमात्मनो 'यस्त्वेतमेवं प्रादेशमात्रमभिविमा-नमात्मानं वैश्वानरमुपास्ते, [छ० ५।१८।१।] इति प्रादेशमात्रव्यपदेशस्तू-पासनासिद्ध्यर्थमित्याश्मरथ्य आचार्यो मन्यते ॥३०॥

वोपस्थापकमिदं प्रकरणमपितु सर्वजगन्निदानं सर्वं व्यापकं सर्वनेतारं सर्वतः पूर्ववर्तिनं पूर्वं पूर्वतरस्यापि नियामकमिति संक्षेपः ॥२९॥

विवरणम्= यदि परमेश्वरः "अस्थूलमनण्वह्रस्वमदीर्घमनलोहि-तम्" इत्यादि श्रुतिभिर्लोकप्रसिद्ध्याच सर्वथैव परिच्छेदरहितः तदा कथम् "यस्त्वेतमेवमभिविमानं प्रादेशमात्रं वैश्वानरमुपास्ते" इत्यादि-स्थले द्युमूर्धत्वादिपरिच्छेदवत्तयोपासनं कथितं तत्कथं संगच्छते, यतः परिच्छेदरहिते परिच्छेदवत्वज्ञानं न प्रमारूपम्, तदभाववति तत्प्रकारकज्ञानरूपत्वात्. रज्जौ सर्पबुद्धिवत्, ततश्च तादृशाप्रमा ज्ञानविषयीभूतपरमात्मोपासनया किमपि फलं नस्यादित्याद्या शङ्कायां परिच्छेदशून्योऽपि परमात्मा भक्तानामुपासनार्थं परिच्छि-न्नवत्तामपि स्वरूपं स्वीकृत्य तद्रूपेण भक्तैरुपास्यमानो भक्तान् अनु-

सर्वोत्पादक सर्वव्यापक परमात्मा। इस प्रकार से साक्षात् अग्नि पदवाच्यता परमात्मा में है, यह जैमिनि कहते हैं ॥२९॥

सारबोधिनी– "अस्थूलमनणु" इत्यादि श्रुतियों से सिद्ध होता है कि भगवान् परमपुरुष अतिमात्र हैं। अर्थात् मात्रा परिच्छेदरहित हैं। तब देहावयवादि मात्रावत्व रूप से उन की कल्पना किस तरह से हो सकती है? तब तदुपासन कैसे हो सकता है। और उपासना के अभाव में सब जगत् में जो व्यवस्था है उस व्यवस्था का विप्लव हो जायगा। इस शंका के उत्तर में आश्मरथ्य आचार्य करते हैं कि यद्यपि भगवान् अतिमात्र हैं तथापि भक्तों के कल्याण के लिए तत्तत् स्थल में तत्तद्रूप से अभिव्यक्त होकर के अभिलषित फल का दायक होते है। जैसे प्रल्हाद के लिए काष्ठ में भी अभिव्यक्त हो

अनुस्मृतेर्बादरिः ।१।२।३१।

द्युप्रभृतीनां मूर्धाद्यवयवत्वेन कल्पनमनुस्मरणार्थमेवेति बादरिराचार्यो मन्यते ॥३१॥

गृह्णातीति न कापिक्षतिरित्याश्मरथ्याचार्यमतं दर्शयितुमाह– "अपरिच्छिन्नस्यापि" इत्यादि । यद्यपि परमपुरुषोऽयोध्याधिपतिः सर्वथैव परिच्छेदरहितः तथापि "यस्त्वेतमेतम्" "वैश्वानरमुपास्ते" इत्यादि स्थलेप्रादेशमात्रतया कथनं. तत्–उपासकानामुपासनासिद्ध्यर्थमेवेति. आश्मरथ्याचार्यमतमिति । अतद्रूपोऽपि पदार्थोभावनया भावितस्तद्रूपतां-लभते तत्फलमपि भवति, श्रूयते खलु गुञ्जापुञ्जामग्निभावनया संभाव्य शिशिरतरमदजटिलकायकाण्डस्य बालकादेः शोतापनोदनम् । भवति च काष्ठेऽपि नृसिंहस्याविर्भावः । तस्मादनन्यगतिकभक्त-स्यानुग्रहाय अमात्रस्यापि परमात्मनः परिच्छेदवत्तयोपासनं फलवदिति कस्यचिदाचार्यस्योद्गारः ॥३०॥

विवरणम्–यथा "अचक्षुः स चक्षुरिवाकर्णः स कर्ण इव मये । भगवान् न तो अमात्र है नवा समात्र किन्तु भक्त पराधीन हैं, सर्वतंत्र होने पर भी । अतः भक्तों के अभिलषित सिध्द्यर्थ अभिव्यक्त होते हैं । ऐसा आचार्य आश्मरथ्य का मत है । उसका अनुवाद करते हैं वृत्तिकार "अपरिच्छिन्नस्यापीत्यादि" । परिच्छेद रहित भी परमात्मा के, "अभिविमान सर्व प्रकार से मात्रा रहित प्रादेशमात्र परिमाणक इस वैश्वानर आत्मा का उपासन करता है ।" इस प्रकार से जो प्रादेशमात्र का कथन है वह अनन्य शरण उपासक के उपासन की सिद्धि के लिए है । इस प्रकार से आश्मरथ्य आचार्य मानते हैं । और इन आचार्य का कथन युक्त भी है, तो वाणी मन के अगोचर भगवान् तत्तत् उचितानुचित शरीर मानवी अमानवी स्वरूप का धारण क्यों करते ! अतः उपासना की सिद्धि के लिए अमात्र भी समात्र होते हैं । इस विषय का विशेष रूप से विचार अन्यत्र देखें ॥३०॥

भवति" इत्यादिश्रवणात् स्वभावतश्चक्षुरादिकरणविहीनोऽपि चक्षुरादिकरणवान् सर्वप्रियो भगवान् भवति. यथावाऽतिव्यापकोप्या-काशो घटाद्युपाधिवलात् घटाकाश इति कथ्यते. यथावा प्रस्थप-रिमितास्तुण्डादिव्रीहिविशेषाः प्रस्था इति व्यपदेशभाजो भवन्ति । तद्वत् स्वभावतो मात्रारहितो ऽपीश्वरः प्रादेशपरिमितमनसा अनुस्मर्य-माणः प्रादेश इति व्यवहारभाग्भवतीति बादरेराचार्यस्यमतं तन्म-तेन स्वमतं परिपुष्णाति वृत्तिकारः "द्युप्रभृतीनाम्" इत्यादि । "द्यौर्मूर्धा चक्षुषी चन्द्रसूर्यौ" इत्यादि स्थले यत्. द्युप्रभृतीनां भगवतो मूर्धाद्यवयवत्वेन परिकल्पनं कृतम्. तत्तु "अनुस्मृतेः" अनुस्मरणार्थमेव । प्रादेशपरिमाणपरिमितहृदयपुण्डरीकस्थित-मनसा अनुस्मर्यमाणतया ईश्वरप्रादेशमात्रकथितो भवति । यथा प्रस्थपरिमाणपरिमितास्तण्डुलादिकाः प्रस्था इत्येवं व्यपदिष्टा-

सारबोधिनी—सर्वथा परिच्छेद रहित जो परमात्मा तादश परमात्माके द्यु प्रभृतिक पृथिवी पर्यन्त प्रदेश सम्बन्ध से वैश्वानर परमात्मा का उपासन हो सकता है । इसके उत्तर में आश्मरथ्य आचार्य के अभिप्राय का प्रदर्शन करके, जिस तरह अति व्यापक अकाश का, जो कि घटादि से अवच्छिन्न होने से घटाकाश है, ऐसा कथन किया जाता है । उसी तरह प्रादेश मात्र मन से अनुस्मर्यमाण वैश्वानर परमात्मा का प्रादेश मात्र का कथन किया जाता है । ऐसा बादरि आचार्य का मत को बतलाने के लिए वृत्तिकार प्रक्रम करते है—"द्यु प्रभृतीनामित्यादि" । स्वर्ग लोकादि प्रभृति से मूर्धादि अवयव का जो परिकल्पन किया जाता है वह अनुस्मरण के लिए । अर्थात्—

यस्याग्निरास्यं द्यौर्मूर्धा खंनाभिश्चरणौक्षितिः ।
सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः ॥

जिस वैश्वानर परमात्मा का मुख अग्नि है । द्यु लोक स्वर्ग—मस्तक है, आकाश नाभिः है; पृथिवी ही चरण हैं, सूर्यचन्द्रमा नेत्र हैं, और दिशायें

सम्पत्तेरितिजैमिनिस्तथाहि दर्शयति ।१।२।३२।

वैश्वानरोपासकैरनुदिनमनुष्ठीयमानायाः प्राणाहुतेरग्निहोत्रत्वसम्पादनाय 'उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यः [छा० ५।१८।२।] इत्यादिश्रुतिभिर्वेदित्वादिकल्पनोपदेश इति जैमिनिराचार्यो मन्यते ।

भवन्ति. तद्वत् परमात्मापि मनोपाधिकत्वात् प्रादेशमात्रः कथितो भवति. नतु स्वरूपतस्तथा । यथावा घटावच्छिन्नाकाशे घटाकाश इति । एवञ्चानुस्मरणार्थमेव विगतपरिमाणस्यापि परमात्मनः प्रादेशमात्र कथनमिति बादरेराचार्यस्य मतमिति दिक् । विशेषस्तु भाष्यानुसरणमेव रसणम् ॥३१॥

विवरणम्–पूर्वपूर्वतरसूत्रसमुदायैर्भूरादिलोकशरीरविशिष्टस्य परमपुरुषस्य भगवतो वैश्वानरपदवाच्यत्वं प्रतिपादितवान् । तथा द्युप्रभृतिचिबुकमात्रे वैश्वानरस्योपास्यत्वप्रतिपादनेन परमेश्वरस्य प्रादेशमात्रत्वमपि संपन्नमिति प्रादेशमात्रसंपत्तेः प्रादेशमात्रप्रतिपादक श्रोत्र है, एतादृश लोकात्मक परमात्मा को नमस्कार है ।

इत्याद्यनेक स्थल में जो द्यु मूर्धादि अवयव विशिष्टतया परमात्मा का कथन है, वह परमात्मा सावयव है, इस अभिप्राय से नहीं किन्तु सर्व व्यापक भी परमात्मा प्रादेशमात्र परिमित मन से स्मरण का विषय होते हैं, इसलिए उन परमेश्वर में प्रादेशमात्रता का कथन किया गया है । ऐसा बादरि आचार्य की मान्यता है यथा आकाश व्यापक है, तथापि घटावच्छिन्न होने से घटाकाश पद से व्यवह्रियमाण होता है । उसी तरह ईश्वर प्रादेश परिमित मन से स्मरण का विषय होने से प्रादेश परिमाण रूप से ही अनुस्मरणीय होते हैं ॥३१॥

सारबोधिनी–इसके पूर्वसूत्र में कहा गया है कि प्रादेशमात्र प्रमाणवाला जो हृदय प्रदेश तादृश प्रादेशमात्र प्रतिष्ठत मन के द्वारा स्मृयमाण यह वैश्वानर परमात्मा भी प्रादेश मात्र कहलाता है । जिस प्रकार से सेर परिमित

एवमनुष्ठानेन परमपुरुषाराधनफलमग्निहोत्रसम्पत्तिश्च दर्शयति । 'अथ य एतदेव विद्वानग्निहोत्रं जुहोति' [छा० ५।२४।२।] इति श्रुतिः ॥३२॥

श्रुतिरपि सफला तत उर एव वेदिर्लोमानि बर्हिरित्यादि किमर्थं कल्पनमिति तदर्थं जैमिनेर्मतं दर्शयितुं प्रक्रमते "वैश्वानरोपासकैः" इत्यादि । यः खलु वैश्वानरस्य पुरुषस्योपासकास्तैः क्रियमाणायाः प्राणाहुतेः प्रत्यहिकाग्निहोत्रवत. अग्निहोत्रत्वस्य संपादनम्' अस्य वैश्वानरोपासकस्योरुवक्षः स्थलमेव वेदिः, यथा नैयमिकाग्निहोत्रे आहुत्यर्थं वेदि भवति बाह्य स्थण्डिलादिकं तदस्योपासकस्य स्वयं वक्षः स्थलमेव वेदिः, तत्र नैयमिकाग्निहोत्रं वेदिकोपरि–आस्तरणाय बाह्याः कुशा भवन्ति तदत्रोपासकस्य वक्षसि स्थितानि लोमानि क्षुद्राः केशा एवास्तरणीयकुशस्थानीयाः । एवं नैयमिकाग्निहोत्रे आहुत्य-

जो तण्डुल उसको सेर प्रमाणक है ऐसा कहा जाता है । परन्तु जैमिनि आचार्य कहते हैं कि संपत्ति निमित्तक यह प्रादेशमात्र श्रुति है । इस विषय को स्पष्ट करने के लिए कहते हैं–"वैश्वानरोपासकैः" इत्यादि । वैश्वानर परमात्मा का जो उपासक है, तादृश उपासक के द्वारा अनुष्ठीयमान जो प्राणाहुति, तादृश प्राणाहुति को अग्निहोत्रता का संपादन करने के लिए कहा है कि, "उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यः" [उर वक्षः स्थल में ईश्वरोपासक का जो उरसूवक्षः स्थल है वही वेदी है । उरस में रहनेवाला रोमही बर्हिदर्भ है और वही गार्हपत्य नामक अग्नि है ।] इत्यादि श्रुति में दर्भादि कल्पना का उपदेश है ऐसा जैमिनि आचार्य मानते हैं । इस प्रकार से अनुष्ठान करने पर वैश्वानर परमात्मा की आराधना की गई । तादृश संपत्ति का भी प्रतिपादन किया जाता है इस प्रकार से श्रुति बतलाती है । "अथ य एतदेव विद्वान्" [अथ–जो विद्वान् ज्ञानपूर्वक इस अग्निहोत्र का संपादन करता है ।] इस प्रकार से वृत्ति का अक्षरार्थ होता है । इसके भावार्थ रूप में

धिकरणमग्निर्भवति तदत्रोपासकस्य स्वकीयं हृदयमेवगार्हपत्याग्निस्थानापन्नं भवति, अथाह वैश्वानरोपासकः स्वकीयशरीरावयवेष्वेवाग्निहोत्रं संपादयेत् । एवमादिश्रुतिभिर्वेदित्वादिकल्पनाया उपदेशः कृत इत्येवं रूपेण जैमिनिनामक आचार्यो मन्यते । एतादृशानुष्ठान करणेनाराधितो भवति भगवान् परमपुरुषस्तथोपासकस्य स्वकीय शरीरावयवेषु प्रसिद्धनैयमिकाग्निहोत्रस्यापि संपत्तिर्जायते । अथ यः खलुपासकः, एतादृशमग्निहोत्रं स्वशरीरावयवेषु परिकल्पितमग्निहोत्रं जुहोति तादृशाग्निहोत्रमनुतिष्ठति तस्य तथा फलं भवतीति श्रुतिरपि समर्थयति ।

यद्यप्यत्रानेके आचार्याः स्वस्वाभिमतमर्थमनेकधा कुर्वन्ति परन्तु भगवन्तः श्रीमदानन्दभाष्यकारास्तु इत्थमादिशन्ति । तथाहि वैश्वानरोपासकैः संपाद्यमानाया वैश्वानरविद्याया अङ्गभूतायाः "तद्यद् भक्तमागच्छेत्तद्धोमीयम्" इति श्रुत्युक्तप्राणाहुतेरग्निहोत्रत्वसंपादनाय तेषामुरः प्रभृतीनां वेद्यादिपरिकल्पनमिति जैमिनिराचार्यो मन्यते । तदित्थम्. वैश्वानरपरमात्मनः समुपासकोऽधिकारी मदीयशिर एव भगवतो वैश्वानरस्य मूर्धा भवति मम नेत्रे एव वैश्वानरस्य चक्षुषी

श्रीसम्प्रदायाचार्य आनन्दभाष्यकार जगद्गुरु श्रीरामानन्दाचार्य जी ने तो ऐसा वर्णन किया है कि:-वैश्वानर परमात्मा का उपासक जो साधक हैं वे लोग वैश्वानर विद्या का अङ्ग लक्षण जो प्राणाहुति शास्त्र प्रदर्शित है उसमें अग्निहोत्र यज्ञत्व संपादन करने के लिए वेदिप्रभृति की कल्पना करते हैं । यथा वैश्वानर परमात्मा का उपासक चिन्तन करता है मेरा जो मस्तक है वह वैश्वानर का मस्तक है । मेरी आँख हो वैश्वानर की आँख हैं । मेरा उरःस्थल वैश्वानर का उरः स्थल वेदी है । मेरा मन हो अन्वाहार्य पचन है । मेरा मुख हो वैश्वानर आहवनीय आस्य हैं । प्राण को आहुति हो अग्निहोत्र है । इस प्रकार से अपने शरीर के अङ्गों में वैश्वानरीय अङ्गों की संपत्ति से

आमनन्ति चैनमस्मिन् ।१।२।३३।

अस्मिन् वैश्वानरोपासकशरीरे प्राणाग्निहोत्रानुष्ठानेनोपासनार्थमेनं परमात्मानमामनन्तिच्छन्दोगाः । "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः" [छा० ५।१८।२] इति । प्राणाग्निहोत्रानुष्ठान

वक्षःस्थलम् वैश्वानरस्य वक्षोवेदिरग्निहोत्रस्य. मन एवान्वाहार्यपचनोग्निर्मदीयं मुखमेव वैश्वानरस्याहवनीयं सुखम्. तथा प्राणादीनामाहुतिरेवाग्नि होत्रम्. एवं प्रकारेण स्वावयवेषु वैश्वानरावयवानां संपादनं कृत्वैव स्वकीयान्यङ्गान्येव वैश्वानरस्यावयवा इतिमत्वा प्रतिदिनं प्राणाहुतिभिः स्वकीयहृदयकमलासनस्थं परमात्मं वैश्वानरं समुपासित । तदत्र प्राणोपासनस्य फलं प्राणाग्निहोत्रसंपत्तिश्चापि श्रुतिर्दर्शयति, "अथ य एतदेव विद्वानग्निहोत्रं जुहोति" इत्यादि । "सर्वैपाप्मानः प्रदूयन्ते" बहिर्निक्षिप्ततूलवदित्यादि ॥३२॥

विवरणम्= वैश्वानरपदेन जाठराग्ने र्जीवस्याग्निशरीरकदेवस्य परमात्मनो वा ग्रहणं कर्त्तव्यं कस्य वा नेति विचारे. परमात्मन एव ग्रहणं कर्त्तव्यं नान्यस्य तद्व्यतिरिक्तस्येति पूर्वं पूर्वतरानेकैः सूत्रैर्निर्धारणं कृत्वा सम्प्रति प्रकरणोपसंहारार्थमन्तिमसूत्रमुदाहर्त्तुमाह वृत्तिकारः "अस्मिन् वैश्वानरोपासकशरीर" इत्यादि । यः खलूपासको भगवतो वैश्वानरपरमात्मन उपासनां करोति तादृशोपासकस्य स्वकीय अङ्गों को वैश्वानर का अङ्ग समझ करके प्रतिदिन स्वमनः स्थित वैश्वानरपरमात्मा का उपासन करे । इस प्राणाग्निहोत्र उपासन का फल भी "एवंहास्य सर्वे पाप्मानः प्रदूयन्ते" इत्यादि कहा है । इसलिए अति व्यापक परमात्मा के लिए भी प्रादेशमात्रकथन अयुक्त नहीं है । ॥३२॥

सारबोधिनी—"स, एष वैश्वानरः प्राणोऽग्निरूद्यते" [यह वैश्वानर प्राण रूप अग्नि उदित होता है ।] इत्यादि स्थल में वैश्वानर उपास्य है ऐसा प्रतीत होता है । तो इसमें वैश्वानर पदवाच्य भूताग्नि है, अथवा अधिष्ठाता

समये समुपासकेन स्वकीयमूर्धाद्यवयवानामिव द्युप्रभृतीनाम्परमपुरुषस्य मूर्धाद्यवयवत्वेनानुसन्धेयत्वमिति तात्पर्यम् ॥३३॥

इति वैश्वानराधिकरणम् ॥७॥

इति श्रीभगवद्रामानन्दाचार्यान्वयप्रतिष्ठितश्रीमदनुभवानन्दाचार्यद्वारकेणब्रह्मविज्जगद्गुरु श्रीरामानन्दाचार्य-रघुवराचार्यविरचितायां श्रीरघुवरोयवृत्तौ प्रथमाध्यायस्य द्वितीयः पादः ।

शरीरे तस्य वैश्वानरस्य प्राणाग्निहोत्रद्वारा उपासनायै. एवं प्रकृतं परमात्मानमामनन्ति प्रतिपादयन्ति छन्दोगशाखाध्यायिनः । "तस्य-हवा एतस्ये" त्यादि । एतस्य वैश्वानरस्य परमात्मनस्तेजस्त्वादि गुणविशिष्टो द्युलोक एव मूर्धा. मस्तकस्थानीयः सूर्याचन्द्रमसौ नेत्रस्थानीयौ इत्यादिरूपेण संपूर्णस्यापिमन्त्रस्यार्थः कर्त्तव्यः । एवम् स एषोग्नि वैश्वानरो यत्पुरुषः स यो हैनं वैश्वानरं पुरुषविधं पुरुषेऽन्तः प्रतिष्ठितं वेद" इत्यादि वाजसनेयिशाखाध्येतारः आमनन्ति प्रतिपादयन्ति । एवं प्रकृतं द्युमूर्धत्वादि विशिष्टं परमात्मानम् । तथा वैश्वानरशरीरावयवानां संपत्तिं समुपासकशरीरे दर्शयन्ति. तादृशोपासनस्य फलं सर्वपापप्रणाशादिकमपि दर्शयन्ति । एभिर्हेतुभिर्निश्चितं भवति यत् परमात्माश्रीसाकेताधिपतिसर्वेश्वरोऽनन्तकल्याणगु-

देव है, अथवा जीवात्मा है, अथवा परमात्मा है। ऐसा सन्देह उपस्थित होने पर वैश्वानर पदवाच्य परमात्मा नहीं है। क्योंकि तदनुकूल कोई निश्चित हेतु नहीं मिलता है। इस प्रकार से पूर्वपक्ष होने के बाद परमात्मा ही वैश्वानर पदवाच्य है तदितर नहीं। ऐसा पूर्व सूत्रों से निर्धारित करके उसी परमात्म पक्ष को निश्चित करने के लिए आचार्य ने "आमनन्ति चैनमस्मिन्" इस सूत्र को बना दिया। अब इस सूत्र को व्याख्या करने के लिए वृत्तिकार उपक्रम करते हुए कहते हैं—"अस्मिन् वैश्वानरोपासक शरीरे" इत्यादि। परमात्मा वैश्वानर के उपासन करनेवाले जो यह उपासक व्यक्ति हैं। तादृश उपासक के शरीरावयवों में प्राणाग्निहोत्र का अनुष्ठान द्वारा उपासन करने के लिए

णकः श्रीराम एव वैश्वानरपदेन समुपासनीयो भवति । नतु परमात्मव्यतिरिक्तः स्वातन्त्र्येण भूताग्निर्वा तदभिमानिदेवो वा जीवो वा प्रकृत प्रकरणे समुपासनीयतयागृहितो भवति । यद्यपि पूर्वपक्षयुक्तिनामपि बाहुल्यं दृश्यते तथापि सम्पूर्णप्रकरणस्य पर्यालोचने कृते सति परमात्मापक्ष एव निश्चितो भवति । उत्तरपक्षयुक्त्यादीनां विचाराः "वैश्वानरः साधारणशब्दविशेषादित्यारभ्यं "आमनन्ति चैनमस्मिनित्यन्तसूत्रप्रकरण एव प्रदर्शिता इति । तस्मात् परमात्मा श्रीराम एव वैश्वानरपदेन परिगृहीतव्यः समुपासनीयश्चेति सिद्धम् ॥३३॥ इति वैश्वानराधिकरणम् ।७।

इत्यानन्दभाष्यकारजगद्गुरुश्रीरामानन्दाचार्यपीठाधीश जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगिन्द्रविरचिते श्रीरघुवरीयवृत्तिविवरणे प्रथमाध्यायस्य द्वितीयः पादः ।

इस सर्वेश्वर परमात्मा का प्रतिपादन करते हैं छन्दोगशास्त्राध्यायी लोग । उस छान्दोग्य वाक्य का उल्लेख करते हैं "तस्यहवा" इत्यादि । वह जो यह परमात्मा वैश्वानर है उनका सुतेजो द्यु लोक हो मस्तक है । विश्वरूप सूर्य चक्षु है । वायु प्राण है । पृथक् है वर्त्म जिसका एतादृश वायु आत्मा स्वरूप है । संदेह अर्थात् देह का मध्य भाग आकाश बहुल है क्योंकि सर्वगत होने से । वस्ति ही रयि है । पृथिवी पैर है, प्रतिष्ठास्थान है । इस प्रकार से वैश्वानर के अवयवों में द्यु, वायु, आकाश, जल, पृथिवी में मूर्धा चक्षुरादिक का कल्पनोपदेश है ॥

एवं प्राणाग्निहोत्र के अनुष्ठानावसर में स्वकीय मूर्धादि अवयवों के समान द्यु प्रभृति को परम पुरुष के मूर्धा चक्षुरादि अवयव रूप से परमात्मा को उपास्य रूप से अनेक श्रुतियों में प्रतिपादन किया गया है इसलिए प्रकृत प्रकरण में वैश्वानर पद उपास्य रूप तथा परमात्मा का हो प्रतिपादन होता है किन्तु परमात्म व्यतिरिक्त जीव अथवा जाठरानल अथवा अग्नि के अधिष्ठापक देवों का न तो इस प्रकरण में प्रतिपादन होता है । नवा परमात्म

अथ प्रथमाध्यायस्य तृतीयः पादः

अथ द्युभ्वाद्यधिकरणम् ।१।

द्युभ्वाद्यायतनं स्वशब्दात् ।१।३।१।

आथर्वणिके श्रूयते "यस्मिन् द्यौ पृथिवीचान्तरीक्षमोतं मनस्सह प्राणैश्च सर्वैः । तमेवैकं जानथात्मानम्" [मु० २।२।५।] अत्र द्युभ्वादीनामायतनं किं जीव आहोस्वित्परमात्मेति संशयः । मनः प्राणादीनामुपकरणानां जीवस्यैवसम्भवाज्जीव एवेति पूर्वः पक्षः ।

विवरणम्–प्रथमाध्यायस्य द्वितीयपादे प्रायः रूढ़िपदघटित वाक्यानां ज्ञेयपरमात्मनि यथा समन्वयो भवतीति प्रतिपादितम् । अतः परं यौगिकपदघटितवाक्यानामपि तादृशब्रह्मणि समन्वयं प्रदर्शयितुं प्रवर्तमानस्यास्य तृतीयपादस्यारंभो भवति । तत्रापि सर्वप्रथमं सूत्रमधिकृत्य वार्ता प्रवर्तयन्नाह वृत्तिकारः "आथर्वणिके श्रूयते" इत्यादि । तत्राथर्वणिके मुण्डकोपनिषदि "यस्मिन् द्यौः पृथिवी चान्तरिक्षम्" [यस्मिन् वस्तुनि द्यौर्द्युलोकः चतुर्विधभूतग्रामानामाधारभूतेयं पृथिवी. तथा सर्वैर्वागादिप्राणैरिन्द्रियैः सह मनश्च.

भिन्न जठरानलादिक में उपास्यत्व का हो प्रतिपादन है । अपितु सर्वत्र भगवान् साकेताधिपति श्री रामजी ही वैश्वानर पदवाच्य हैं और समुपासनीय हैं तदितर नहीं ॥३३॥

स्वामी रामेश्वरानन्दाचार्य विरचित श्री रघुवरीयवृत्ति सारबोधिनी में प्रथमाध्याय का द्वितीय पाद समाप्त हुआ ।

श्रीराम शरणं मम

सारबोधिनी–प्रथमाध्याय के द्वितीय पाद में प्रायः रूढ़ पद घटित वाक्यों का परब्रह्म में समन्वय प्रकार को बतला करके प्रकृत पाद में यौगिक पद घटित वाक्यों का परब्रह्म में समन्वय प्रतिपादन करने के लिए प्रक्रम करते हैं– "आथर्वणिके" इत्यादि । आथर्वणिक मुण्डकोपषित् में "यस्मिन् द्यौः पृथिवी

अत्राभिधीयते–प्रकृतश्रुत्यन्तर्गतयोः "तमेवैकं जानथात्मानम्" "अमृतस्यैष सेतुः" इत्येतद्वाक्ययोरात्मशब्दस्य श्रूयमाणत्वादमृतप्रापकत्वाभिधानाच्च द्युप्रभृतीनामायतनत्वेन श्रूयमाणोऽत्र परमात्मैवेत्यवगम्यते ॥१॥

ओतमाश्रितम्. एतादृशमेकं केवलमात्मानं सर्वजगत्कारणं परमात्मानं हे शिष्या यूयं जानथ. अवधारय तदतिरिक्तां वाचं मुंचथ परित्यजत. तथा. यतो यमात्मा अमृतस्य सेतुरिव सेतुः। अर्थात् केवल परमात्म विषयकचर्चां कुरुत, तादृशपरमात्मविचारव्यतिरिक्तं विचारं त्यजत। यतो "नानुध्याया बहून् शब्दान् वाचोविग्लापनं हि तदित्युक्तेरि" त्यर्थः।] तत्र द्यौश्चभूश्चेति द्युभुवौ. द्युभुवौ आदीयेषां ते द्युभुवादयः। एतेषामाधारभूतः कश्चिद् ज्ञायते स किं सर्वाधारभूतः परमात्मा प्रकृते विद्यते अथवा सांख्यमतकल्पितं प्रधानम्, तस्यापि सर्वविकारकारणत्वादायतनत्वं संभवति। अथवा जीवोद्युभ्वाद्यायतनं, जीवस्यापि वागादिकरणानामधिष्ठानत्वादिति संशयः। यत एकपक्षनियामकस्य कस्यचिदभावात्। तत्र द्युभ्वाद्यायतनरूपेण शारीरकजीवस्यैव ग्रहणं युक्तम्, यतोऽत्रप्राणमनसो संकीर्तनात्, प्राणमनसो संबन्धस्तु जीवस्यैव। जीवो हि भोगमिच्छत्

चान्तरिक्षमोतं मनः सह प्राणैस्तमेवैकं जानथात्मानममृतस्य सेतुम्" [जिससे द्यु स्वर्गलोक तथा सब प्राणियों का आधारभूत पृथिवी और वागादिक प्राणों के साथ मन ओत है, अधिष्ठित है। उस एक आत्मा को जानो जो अमृत का सेतु है।] ऐसा सुनने में आता है कि एक ऐसा कोई व्यक्ति है जो कि द्यु पृथिव्यादिक सकल पदार्थों का आयतन आधार है। तो क्या यहाँ द्यु पृथिव्यादि का आयतनाधार जीवात्मा है, अथवा परमात्मा इन सबका आधार है? ऐसा सन्देह होता है। क्योंकि जीवात्मा भोक्ता है तो वह भी भोग्य वस्तुओं का आधार हो सकता है। और परमात्मा तो "यतो वा

स्थूलशरीरमधिष्ठाय प्राणमनसोः साहाय्येन भोगमनुभवति, करणरहितस्यकर्तुः कार्यानुत्पादात् । नहि तण्डुलादिसाहाय्यरहितः पाचकः पाकक्रियां कर्तुं शक्नोति । तद्वदिह मनः साहाय्यमपेक्षमाणो जीव एवायतनं यथा कथञ्चित्सर्वेषां भविष्यति । यद्यपि सर्वसमर्थं परमात्मा तथापि तस्येह ग्रहणं न संभवति, तस्य मनः प्राणयोः सम्बन्धासंभवात् । "अप्राणोह्यमनाः शुभ्रः" अपाणि पादः, "न तस्य कार्यं करणञ्च विद्यते" इत्यादिना प्राणमनसोः संबन्धाभावप्रतिपादनात् यदि कदाचिद परमात्मरूपस्यापि प्राणमनसोः सम्बन्धमिच्छेत्तदा सर्वस्वातंत्र्यं भगवतो विलुप्येत । अपि च "अमृतस्यैष सेतु" एवमत्र श्रूयते, पारवान् हि देशः सेतुरिति कथ्यते नहि परमात्मनः पारवत्वं संभवति. "अनन्तमपारमिति" श्रुतेः । किञ्च "अरा इव रथ नाभौ" इत्यादि उत्तरवाक्यमपि जीवपक्षमेव समर्थयति । जीवश्च भोक्ता स च भोग्यान् द्युप्रभृतिकान् पदार्थान् प्रतिभोक्तृत्वेनायतनं संभविष्यति तस्माज्जीवपक्ष एव श्रेयान् नतु परमात्मपक्षोऽसंभवादिति पूर्वपक्षः ।

तमिमं पूर्वपक्षं निराकृत्य परमात्मपक्षं व्यवस्थापयितुं वृत्तिकारः "अत्राभिधीयते" इति वदन् सूत्रमुदाहरति, "द्युभ्वाद्यायतनं स्व-

इमानि भूतानि जायन्ते" इत्यादि अनेक श्रुतियों से सिद्ध होता है कि समस्त जगत् का आधार है । नियामक निर्णीत हेतु के अभाव होने से सन्देह होता है कि यहाँ द्युभ्वाद्यायतन से किसका ग्रहण करना चाहिए । एतादृश सन्देह के बाद पूर्वपक्ष कहते हैं कि जीव का ही द्युभ्वाद्यायतनरूप में ग्रहण करना चाहिए । क्योंकि इस प्रकरण में मन प्राण प्रभृतिक उपकरण का कथन है । तो तादृश मन प्रभृतिक उपकरणवाला तो जीव ही है । परमात्मा तो प्राणादि उपकरणवान् नहीं है । क्योंकि "अप्राणोह्यमनाः शुभ्रः" "न तस्य कार्यं करणञ्च विद्यते" [वह परम पुरुष वागादिक प्राण रहित है । तथा

शब्दात्'' इति द्युपृथिव्यादि सकलपदार्थानामायतनं परमात्मैव भवति नतु जीवः, कस्मात् तत्र हेतुं पठतिः ''स्वशब्दात्'' स्वस्य परमपुरुषस्य वाचकोऽनन्यसाधारणः शब्दः प्रकृतप्रकरणे श्रूयते । ''तमेवैकं जानथात्मानम्'' तथा ''अमृतस्य सेतुः'' नेदं वाक्यं परमात्मव्यतिरिक्तस्य ग्रहणे समञ्जसं भवति, ज्ञेयत्वं सर्वत्रवेदान्ते परब्रह्मण एव श्रुतम्, जीवस्तु न ज्ञेयोऽपितु ज्ञातैव तथा अमृतसेतुत्वमपि परमात्मन एव नतु तदन्यस्य ''एष एव आनन्दयती''ति श्रवणात् । परमात्मैवानन्दमहोदधि र्न जीवः। ''एतस्यैवानन्दस्य मात्रामुपजीवन्त्यन्यानि भूतानी''त्यादि वाक्येन जीवस्य परिच्छिन्नानन्दवत्वप्रतिपादनात्। तस्मात् परमात्मैव द्युभ्वादीनामायतनं नतु तदन्यः कश्चित् । यतोऽत्रपरमात्मबोधकवाक्यानामेव बाहुल्येन दर्शनात् । एवं ''सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः'' । इत्यादि छान्दोग्य वाक्ये परमात्मवाचकपदेनैव परमात्मनो ग्रहणं दृश्यते । तथा पूर्वापरवाक्येषु ''पुरुष एवेदं सर्वम्'' ''ब्रह्मैवेदममृतं पुरस्तात्'' इति सर्वायतन रूपेण ब्रह्मण एव सङ्कीर्तनं दृश्यते तस्मादपि

मनरूपकरण से भी रहीत है। उस परमेश्वर का कार्य अर्थात् शरीर नहीं है। एवं करण जो चक्षुरादि हैं वे भी नहीं है ।] इत्यादि श्रुतियों से शरीरादिक का निषेध किया गया है । इसलिए द्युभ्वाद्यायतन से परमात्मा का ग्रहण नहीं होता है। किन्तु प्राणमन विशिष्ट जीव का ही ग्रहण होता है। अथवा सांख्य मत कल्पित प्रधान का ग्रहण होता है। क्योंकि प्रधान भी महत्तत्वादि सकल विकार का कारण होने से द्यु पृथिव्यादि पदार्थों का आयतन आधार हो सकता है ।

एतादृश पूर्वपक्ष के उत्तर में कहते हैं–''अत्राभीधीयते'' इत्यादि ''द्युभ्वाद्यायतनं स्वशब्दात्'' द्यु पृथिव्यादि सकल पदार्थों का आयतन परमात्मा ही है। क्योंकि 'स्व' परमात्मा का बोधक विशेष पद का कथन है।

मुक्तोपसृप्यव्यपदेशात् ।१।३।२।

इतश्च द्युभ्वाद्यायतनभूतः परमात्मा । यतोऽत्र प्रकरणे मुक्तोपसृप्यत्वस्य व्यपदेशो दृश्यते । "तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" [मु० ३।१।३।] "तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" [मु० ३।२।८।] इत्येतस्मान्मुक्तप्राप्यत्वाभिधानादयं परमपुरुष एव ॥२॥

सिद्धं भवति. यद्त्र द्युपृथिव्यादीनामायतनरूपेण यत् श्रूयते तत् परं ब्रह्मैव नतु तदतिरिक्तं किञ्चित् । प्रधानपक्षस्तु ज्ञानवत्वाद्यभावादेवपराकृतो भवति । जीवोऽपि तनुमाहात्म्यवत्वादल्पज्ञत्वदुःखवत्वादुपहतप्रतिहत एव भवतीति । यदप्युक्ते पूर्वपक्षे प्राणमनसो सम्बन्धाज्जीव एव समुपस्थितो भवति परमात्मा तु नोपस्थितः "अप्राणो ह्यमनाः शुभ्रः" इत्यादिवाक्येन परमात्मनो निषेधादिति तदपि न युक्तम्. "अप्राणो ह्यमनाः" इत्यादिवाक्यं प्राणमनोधीन प्रवृत्तिराहित्यमेव परमात्मनो भवतीत्येतावन्मात्र प्रतिषेधकम्. नतु मन सम्बन्धराहित्यस्यापि परमात्मनः सर्वशरीरकत्वात् । "मनोमयः प्राणशरीर नेता" इत्यादौ तस्य प्राणमनसो सम्बन्धप्रतिपादनादिति संक्षेपः ॥१॥

विवरणम्—इतः पूर्वसूत्रे आत्मपदस्य तथा अमृतप्रापकत्वस्य च हेतोः परमपुरुषबोधकस्य विद्यमानत्वेन द्यावापृथिव्यादीनामा-

"तमेवैकं जानथात्मानम्" "अमृतस्यैष सेतुः [उस एक आत्मा को जानो । यह परमात्मा अमृत का सेतु है ।] एतद्वाक्य घटक आत्मा शब्द का श्रवण है । तथा अमृत प्रापकत्व भी तो परमात्मा में ही है । इसलिए ये सब विशेषणों के श्रूयमाण होने से परमात्मा ही द्युभ्वादि का आयतन है । जीव अथवा प्रधान नहीं । क्योंकि इन में आत्मत्व तथा अमृत प्रापकत्व नहीं है । अतः परमात्मा पक्ष ही उचित है ॥१।३।१॥

धारभूतः परमात्मैव, न तदन्यो जीवः प्रधानं वेति प्रतिपाद्य. यश्चाविद्याकामशोकमोहादिरहित उपासकस्तादृशमुक्तपुरुषेण प्राप्यः परमात्मैव भवतीति शास्त्रे प्रतिपादनात् परमात्मैव द्युपृथिव्यादीनामायतनभूत इति दर्शयितुं सूत्रार्थाविष्करणायोपक्रमते "इतश्च द्युभ्वाद्यायतनभूतः परमात्मा" इत्यादि यतो वक्ष्यमाण मुक्तोपसृप्यत्वव्यपदेशादपि परमात्मैव द्युपृथिव्यादीनामायतनभूत इति गम्यते मुक्तैर्विधूतसंसारमलैः पुरुषैरुपसृप्यः प्राप्यः पर-परमात्मा भवति. इति क्रमेण शास्त्रे व्यपदेशः कृतस्तेन ज्ञायते यदत्र परमात्मैव द्यावापृथिव्यादीनामाधारभूत इति । कुत्र कथं वा शास्त्रे व्यपदेशस्तद्दर्शयितुमाह 'यतोऽत्र प्रकरणे" इत्यादि ।

यतोस्मिन् प्रतिपाद्याधिकरणे जीवात्मा सकलपापरहितः परमात्मानं प्राप्नोति, प्राप्तिक्रियायाः कर्त्ता जीवो भवति । तादृश क्रियायाः कर्म च भवति परमपुरुषः नहि एक एवैकस्याः क्रियायाः कर्म च

सारबोधिनी—द्युभ्वादियों का आयतन परमात्मा है जीवादिक नहीं। क्योंकि "तमेवैकं जानथात्मानम्" "अमृतस्य सेतुः" इत्यादि स्थल में परमात्मा का वाचक आत्मपद है। तथा अमृतस्य यह पद है—इससे सिद्ध होता है कि परमात्मा ही द्युभ्वायतन है इस वात को प्रथम सूत्र से सिद्ध करके अब वक्ष्यमाण मुक्तोपसृप्यत्व हेतु से भी पृथिव्यादि का आयतन परमात्मा ही है इसको सिद्ध करने के लिए उपक्रम करते हैं—"इतश्च द्युभ्वायतन" इत्यादि। इस वक्ष्यमाण हेतु से भी सिद्ध होता है कि द्युभ्वादि सकल पदार्थों का आधार परमात्मा ही है। इसलिए इस प्रकरण में मुक्तोपसृप्यत्व का प्रतिपादन किया गया है। तादृश प्रतिपादक वाक्य का उद्धरण करते हैं "तदाविद्वानित्यादि" [जबकि यह विद्वान् उपासक जीव उपासनादि शास्त्र प्रतिपादित प्रकार से भगवान् का आराधन करके विशुद्धान्तःकरणवाला हो जाता है तब संसार प्रयोजक

कर्त्ता चेत्युभयं संभवति, विरोधादतोविनाशितशोकादिमता मुक्तेनोपसृप्यत्वात् पृथिवीप्रभृतीनामाधारः परमात्मैव ।

मुक्तोपसृप्यताप्रतिपादकश्रुतिमुदाहरति-"तदा विद्वानित्यादि"। यदा निवृत्तैषण उपासको भगवन्तमाराध्य विमलान्तः करणो भवति. तदा विशेषतः पुण्यपापाख्ये कर्मणी निराकृत्य सर्वदुःखरहितः सन् आराध्यस्य परमसमतामेति । तथा "तथाविद्वान् नामरूपेत्यादि" भगवदाराधनया नामरूपाभ्यां सांसारिकशोकमोहाभ्यां विमुक्तः सर्वथा संबन्धरहित आराधकः परात् कार्यब्रह्मणोऽपि परं परम पुरुषपरमात्मानं श्रीरामं दिव्यमनन्तकल्याणगुणैकनिलयमुपैत्यचिरेणैव प्राप्नोति । इत्यादि स्थले परमपुरुषस्य मुक्तेन प्राप्यत्वदर्शनाज् ज्ञायते यत्परमपुरुषः परमात्मैव द्युभ्वादीनामाधारः श्रुतो भवति. नतु तदतिरिक्तः। तत्र न मुक्तोजीवोजीवमेव प्राप्नुयात् । नवा चेतनो-

शुभाशुभ कर्म समुदाय को विनष्ट करके सर्व प्रकारक अनन्तक्लेश का निराकरण करके स्वाराध्य परम पुरुष भगवान् श्रीराम की परम समता को प्राप्त कर जाता है । एवम् "तथा विद्वान् नाम रूपादित्यादि । इसी प्रकार से वाक्यान्तर भी कहता है "विद्वान् आराधक पुरुष नामरूप से सांसारिक पदार्थजात से विमुक्त होकर परात्परः पर जो हिरण्यगर्भरूप ब्रह्म. उससे भी पर जो कि दिव्य है अर्थात् लोकोत्तर अनन्त कल्याण गुणों का राशि है तादृश महापुरुष वेदान्तवेद्य श्रीराम को प्राप्त कर जाता है।" इस प्रकार से अनेक वाक्यों में मुक्त जीवों से भगवान् को प्राप्य बतलाया गया है। तो मुक्तोपसृप्य भगवान् परमपुरुष हो "यस्मिन् द्यौः पृथिवी" इत्यादि वाक्य से अवगत जो द्युभ्वादि का आयतनरूप से श्रुयमाण है वह परम पुरुष ही है । नतु जीव या प्रधान क्योंकि जीव तो बद्ध है, और प्रधान जड़ है। तो उसमें चेतन मुक्त की उपसृप्यता बाधित है । इसमें विशेष विवरण भाष्य ग्रन्थ विवरण में देखें। यहाँ तो संक्षेप से कथन किया गया है ॥२॥

नानुमानमतच्छब्दात् ।१।३।३।

आनुमानं प्रधानमत्र द्युभ्वाद्यायतनत्वेन न प्रतिपाद्यम् । कुत इति चेत्तत्प्रतिपादकशब्दस्यास्मिन् प्रकरणेऽश्रवणात् ॥३॥

जीवोऽचेतनं प्राप्नुयात्, तादृशप्राप्तेस्तयोरसंभवात् तस्मात् परम पुरुषे एवतत्संभवात् स एव तथेति संक्षेपः ॥२॥

विवरणम्—सर्वजगत्कारणतया द्युभ्वाद्यायतनतया च परब्रह्मणो यथा ग्रहणं भवति तथा सांख्यमतकल्पितं प्रधानमपि सर्वजगतः कारणं भवत्येवेतितत्कथं न तस्य द्युभ्वाद्यायतनतया ग्रहणं स्यात्, इत्याशंक्य यथा परमात्मनः प्रतिपादको हेतुविशेषः स्वशब्दस्तथा मुक्तोपसृप्यत्वादिको विशेषहेतुः प्रतिपादितं शास्त्रे. न तथान्यस्य कृते तस्मात् सांख्यस्मृतिपरिकल्पितमानुमानिकं प्रधानमत्र द्युभ्वाद्यायतनं न ज्ञातव्यम् यतः तस्य प्रतिपादकशब्दस्याभावात् । न चेहाचेतनस्य प्रतिपादकः शब्दोविद्यते । परमात्मनस्तु "यः सर्वज्ञः ससर्ववित्" "तमेवैकं जानथात्मानम्" इत्यादि शब्दो विद्यते । तस्मात्

सारबोधिनी—जैसे परमात्मा सकल जगत् का कारण है अत द्यु पृथिव्यादि के आयतन रूप से परमात्मा का ग्रहण किया जाता है । वैसे सर्व जगत् का कारण तो सांख्य स्मृति परिकल्पित प्रधान भी है, तो वह भी आकाशादि सकल जगत् का उपादान कारण है । तब तो प्रधान का ही द्युभ्वायतन रूप से ग्रहण होना चाहिए । इस शंका के उत्तर में कहते हैं सूत्र का उपन्यास करने के लिए "आनुमानं प्रधानम्" इत्यादि । अनुमान अर्थात् मात्र अनुमान प्रमाण सिद्ध जो सांख्य परिकल्पित प्रधान है जिसको प्रधान कारणवादी सकल आकाशादि को विकार रूप से कथन करते हैं, तादृश प्रधान यहाँ द्युभ्वायतन रूप से गृहीत नहीं होता है । क्योंकि "अतच्छब्दात्" उस प्रधान का द्यु पृथिव्यादि का आयतन होने का प्रपिपादक कोई शब्द अर्थात् आगम प्रमाण नहीं है । यह तो केवल अनुमान प्रमाणगम्य है ।

परमेश्वरस्यैव द्युभ्वाद्यायतनतया ग्रहणं भवति नतु स्मृतिपरिकल्पित प्रधानस्येत्याशयेनाह–"आनुमानं प्रधानमत्रे"त्यादि ।' अत्रास्मिन् प्रकरणे आनुमानम्=अर्थात् अनुमानप्रमाणसिद्धं प्रधानं द्युपृथिव्यादीनामायतनरूपेण न प्रतिपादितं तस्य प्रतिपादनं कथं न भवतीतिचेत्. तत्प्रतिपादकप्रधानप्रतिपादकशब्दस्यास्मिन् प्रकरणेऽश्रवणात् । यथा "तमेवैकं विजानथात्मानम्" "यः सर्वज्ञः ससर्ववित्" इत्यादिकः परमात्मप्रतिपादकः शब्दराशिर्विद्यते न तथा प्रधान-प्रतिपादकः शब्दोऽस्मिन् प्रकरणे दृश्यते । अनुमीयते इत्यनुमानमनुमितेर्विषयः तस्य न द्युभ्वाद्यायतनतया परिगृहीतव्यं कुतः अतच्छब्दात्=तस्य प्रधानस्य वाचकः शब्दोनास्ति । तस्मात् द्युभ्वाद्यायतनरूपेण प्रधानस्य ग्रहणं न भवति. किन्तु सर्वजगत्कारणस्य सर्वज्ञस्यानन्तकल्याणगुणाकरस्य भगवतो रामस्यैव द्यु पृथिव्यादीनामायतनरूपेण ग्रहणं भवतीति सिद्धान्तः । तदत्र

तथा जीव और जीव का विशेष गुण न होने से मानस प्रत्यक्ष का विषय नहीं है । प्रधान जगत् का कारण है, एतादृश कोई वेद भी प्रमाण नहीं है । अर्थापत्ति अनुपलब्धि की तो संभावना भी नहीं है । तब केवल कार्य लिङ्ग का तर्कानुगृहीत अनुमान प्रमाण द्वारा ही अनुमेय होता है। परन्तु केवल आगमगम्य अर्थ में शुष्क तर्क को अवसर प्राप्त नहीं होता है । जिस तरह स्वर्ग अपूर्वादि के विषयों में तर्क सह कृत मान व्यवस्थापक नहीं है । ऐसा सब वादियोंने स्वीकार किया है । अतः एतादृश जगत् कारणता के विषय में केवल शब्द ही है वह शब्द प्रमाण प्रधान की कारणता प्रतिपादक नहीं है । अतः केवल आनुमानिक प्रधान द्युपृथिव्यादि कार्य जगत् का आयतन नहीं है । किन्तु "तमेवैकमात्मानं जानथ" "अमृतस्य सेतुः" "यःसर्वज्ञः स सर्ववित्" इत्याद्यनेक श्रुतिस्मृति समर्थित सर्वज्ञ परमात्मा ही द्युभ्वादिकादिकार्य समुदाय का आयतन हैं । एवम् "सन्मूलाः सोम्येमाः प्रजाः सत्प्रतिष्ठाः"

प्राणभृच्च ।१।३।४।

उपरितनसूत्रात्पदद्वयमनुवर्तते । तथा चायमर्थः । प्राणभृज्जीवोऽपि तदभिधेयशब्दाभावान्नास्मिन् प्रकरणेऽभिधीयते । अणुर्जीवस्य द्युभ्वाद्याश्रयत्वासम्भवाच्च ॥४॥

श्रीआनन्दभाष्यकाराः—"यद्यप्यात्मशब्दो जीवरपमात्मोभयसाधारणः प्रधानेऽपि च यया कथञ्चिद्योजयितुं शक्यस्तथापि "तमेवैकं जानथ आत्मानमन्यवाचोविमुञ्चथ" (मु.२।२।५) इति वाग्विमोकपूर्वकमात्मनो विज्ञेयत्वश्रवणात् परमात्मन एवात्मपदग्राह्यत्वम् । तदतिरिक्तविज्ञेयत्वस्यानधिकप्रयोजनकत्वात् । एवञ्चैतत् समानार्थाभिधायिन्या "स्तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्याया द्बहूञ्छब्दान् वाचो विग्लापनं हि तत्" । (बृ.४।४।२१) इत्यस्याः श्रुतेरपि सङ्गतिः । परमात्मन एव याथात्म्यावगमोत्तरकालिकध्रुवानुस्मृतिपदवाच्यप्रज्ञाविषयत्वं न जीवस्येति । तस्माद्युभ्वाद्यायतनं परमात्मैव" । इति ॥३॥

इत्यादि प्रकरणस्थ आगम साक्षादेव सदात्मक ब्रह्म को जगत् का उत्पादक तथा जगत् का आयतनादि का प्रतिपादन करता है । इसलिए भगवान् सर्वेश्वर श्री राम ही द्युभ्वादि पदार्थों का आयतन हैं नतु केवल आनुमानिक प्रधान द्युभू प्रभृतिक जगत् का आयतन इसी बात का स्पष्टीकरण करते हैं "आनुमानमित्यादि" प्रकरण से । आनुमान अर्थात् अनुमान प्रमाण सिद्ध जो प्रधान वह यहाँ द्युभ्वादिकों का आयतन रूप से प्रतिपाद्य नहीं है । क्योंकि प्रधान को द्युभ्वादि के आयतनता का प्रतिपादन करनेवाला कोई शब्दागम नहीं है इस प्रकरण में । इसलिए परमात्मा ही द्युभ्वाद्यायतन है प्रधान नहीं ।१।३।३।

सारबोधिनी—इसके पूर्व तृतीय सुत्र में कहा गया है कि सांख्यमत कल्पित प्रधान सर्व विकार का कारण होने पर भी द्युभ्वादिका आयतन नहीं हो सकता है । पर द्युभ्वादिका आयतन परमात्मा ही है क्योंकि द्युभ्वादि

विवरणम्-पूर्वसूत्रत्रयेण परमात्मन एव द्युभ्वाद्यायतनत्वं व्यवस्थायितं निराकृत श्च जगदायतनतया प्रधानम्। तावता कथं परमात्मन एव कारणत्वम्। आभ्यामतिरिक्तस्य जीवस्यापि तदायतनतया परिग्रहसंभवात्। अचेतनं हि प्रधानमित्यचेतनस्य जगदायतन प्रतिपादकशब्दाभावात् तस्य ग्रहणं नसंभवेत किन्तु जीवस्तु चेतनः चेतनस्य कारणता तु शब्देन प्रतिपादितैव. अतो जीवस्यापि द्युभ्वाद्यायतनताया निराकरणाय चतुर्थसूत्रमवतारयितुमाह "उपरितन सूत्रादि त्यादि"। यथा प्रधानस्य वाचकः शब्दोऽत्र प्रकरणे न विद्यते तद्वत् प्राणभृतो जीवस्यापि द्युभ्वाद्यायतनता प्रतिपादकः शब्दोनास्ति. तस्मात् यथा प्रधानस्य तथा जीवस्यापि ग्रहणं न संभवति। कुतः?

का आयतन प्रधान है, इस प्रकार से कोई प्रतिपादक शब्द नहीं है। किन्तु "यः सर्वज्ञः स सर्ववित्" अमृतस्य सेतुः" इत्यादि शब्द चेतन को आयतन रूप से कथन करता है। अचेतन का प्रतिपादन नहीं करता है। एतावता अचेतन का निराकरण होने पर भी चेतन जो जीव है उसका द्युभ्वाद्यायतन रूप से ग्रहण तो हो सकता है एतादृश शंका का निराकरण करने के लिए कहते हैं "प्राणभृच्च" जिस तरह प्रधान द्युभ्वादिका आयतन नहीं है क्योंकि तत्प्रतिपादक शब्द का अभाव होने से। उसी प्रकार से प्राणभृत् जोव भी द्युभ्वादि का आयतन नहीं है। क्योंकि जीव का भी प्रतिपादक कोई शब्द नहीं इस बात को बतलाने के लिए सूत्र का अर्थ करते हुये कहते हैं—"उपरितन सूत्रात्" इत्यादि। पूर्व सूत्र जो नानुमानमतच्छब्दात्, इस सूत्र से दो पदों का अनुवर्तन इस सूत्र में किया जाता है। अर्थात् साध्य वाचक न पद तथा हेतुवाचक अतच्छब्दात् यह पद। इन दोनों पदों का अनुवर्तन पूर्वसूत्र से किया जाता है। पूर्वसूत्र से अनुवर्तन करने से क्या हुआ? इस जिज्ञासा के उत्तर में कहते हैं "तथाचायमर्थः" इत्यादि।। जब इस सूत्र में पूर्व सूत्र से पदद्वय का

अशब्दादेवेति। यद्यपि प्रधानमचेतनमिति तस्य प्रतिपादकः शब्दो न भवति किन्तु जीवस्तु चेतनः तस्य कारणता प्रतिपादकशब्दास्तु बहवः सन्ति. तथापि स्वशब्देन जीवकारणताया प्रतिपादकशब्दानामभाव एवेति ॥प्राणभृच्चेति सूत्रे नेतिपदमतच्छब्दादिति च पदद्वयमनुवर्तते। अर्थात् साध्यहेतुवाचाकपदयोरनुवर्तनमुपरितनसूत्रादत्र भवति। प्राणान् बिभर्ति धारयति यः स प्राणभृज् जीवः सोऽपि पृथिव्यादीनामायातनरूपो न संभवति तत्प्रतिपादकशब्दाभावात् इति जीवप्रतिपादकशब्दाभावादत्र प्रकरणे द्युभ्वाद्यायतनरूपेण जीवस्य ग्रहणं न भवति। अपि च "स चाणु चेतनः" इतिश्रौतार्थसङ्ग्रहोक्ते जीवस्याणुपरिमाणात् व्यापकतया अभिमतानामाकाशादीनां महताञ्च पृथिव्यादीनां प्रति तस्यायतनता नैव संभवतीति संक्षेपः ॥४॥

अनुवर्तन करते हैं तब इस सूत्र का यह अर्थ होता है कि यह जो प्राणभृत् प्राणादि उपकरण वाला है वह भी द्युभ्वादि का आयतन नहीं है। क्योंकि जीव का अभिधायक वाचक पद का अभाव है। यदि जीव वाचक कोई भी पद होता तब तो द्युभ्वादि का आयतन रूप से परिगृहीत होता। यहां तो कोई भी शब्द जीव वाचक नहीं है। इस प्रकरण में जीववाचक पदाभाव होने से जीव द्युभ्वाद्यायतन रूप से अभिधीयमान नहीं होता है। और जीव तो स्वयं अणु है इसलिए भी अणुजीव द्युभ्वादिक महत् परम व्यापक पदार्थों का आयतन नहीं बन सकता है। कदाचित् जीव को मध्यम अथवा व्यापक परिमाण मान लें तो उत्क्रान्ति गत्यागति नहीं हो सकेगी। जीव के परिमाण के विषय में सूत्रकार द्वितीयाध्याय के तृतीयपाद में स्वयमेव कहेंगे। इसलिए चेतन होता हुआ भी जीव द्युभ्वादि पदार्थों का आयतन रूप से परिगृहीत नहीं होता है नवा प्रधानादिक द्युलोकादि का आयतन हैं। किन्तु परम पुरुष ही द्युभ्वादिक पदार्थों का आयतन है यह सिद्ध होता है ॥४॥

भेदव्यपदेशात् ॥१।३।५॥

'तमेवैकं जानथात्मानम्' [मु०२।२।५।] इति जीवपरयोर्भेदव्यपदेशादयं द्युभ्वाद्यायतनभूतः पर एव ॥५॥

विवरणम्—अथ "यथाग्नेः क्षुद्राविस्फुलिङ्गान्युच्चरन्ति" एवमेवास्मादात्मनो जीवाव्युच्चरन्तीति श्रुत्या परस्माज्जायमानपराधार भूतस्य प्राणभृतो जीवस्य परस्मादभिन्नत्वेन परमात्मवत् प्राणभृतोऽपि द्युभ्वाद्यायतनत्वं कुतो नस्यादित्याशङ्क्य. भवेदेवं यदि जीवपरयोरेकान्ततोऽभेदो भवेन्नत्वेवं किन्तु तयोर्भेद एवेति तद्दर्शनाय "भेदव्यपदेशादिति" सूत्रमवतारयितुमाह "तमेवैकम्" इत्यादि। अयंभावः "तमेवैकं जानथात्मानम्" "अन्या वाचो विमुञ्चथ" [हे जीवाः तमेव सर्वेशं सर्वनियन्तारं परमात्मानं जानथ, इत्यत्र जीवस्य

सारबोधिनी—सांख्यमत परिकल्पित प्रधान तो अचेतन है अचेतन में द्युभू प्रभृति के आयतनाभाव है। प्रधानमें आयतनता का कथन करनेवाला कोई शब्द नहीं है। इसलिए प्रधान का निराकरण किया गया। परन्तु "एतस्माज्जयते जीवो मनः प्राणेन्द्रियाणिच" तथा "यथानेकैः क्षुद्राविस्फुलिङ्गाव्युच्चरन्ति" इत्यादि श्रुति से जीव पर में आधाराधेय भाव प्रदर्शन होता है और उस में परस्पर घटमृत्तिकावत् अभेद होता है। तो परमात्मा से अभिन्न जो जीव वह भी द्यु पृथिवी प्रभृति का आयतन क्यों नहीं होगा। इस आशङ्का का निराकरण करते हुए जीव तथा परमात्मा में भेद प्रदर्शन करने के लिए कहते हैं कि "तमेवैकं जानथात्मानमित्यादि" उसी एक परमात्मा को जानो, इत्यादि स्थल में जीव तथा परमात्मा में परस्पर भेद का प्रदर्शन होने से द्युभ्वादि का आयतनभूत परमात्मा ही है। भाव कहने का यह है कि श्रुति से यह सिद्ध होता है कि जीव ज्ञाता हैं और परमेश्वर ज्ञेय हैं। तो यह ज्ञाता ज्ञेय भावभेद प्रयुज्य है। तो जब जीव परमात्मा से भिन्न है तब परमात्मनिष्ठ ज्ञेयत्व धर्म जिस

ज्ञातृत्वं दर्शयति. तथा ज्ञेयत्वञ्च परमात्मनो दर्शयति, एतादृशो हि ज्ञातृज्ञेयभावो जीवपरयोरेकान्ताभेदे न घटते, अपितु तयो र्भेद सत्वे एव स्यात्, नहि ज्ञानात्मकक्रियायाः स एव कर्ता स एव च कर्मापि स्यात् कर्तृत्वकर्मत्वयोरेकत्रविरोधात्। नहि भवति देवदत्तो देवदत्तं गच्छति। ततश्च जीवपरयोर्भेदान्न स द्युपृथिव्यादीन् प्रति आयतनत्वं किन्तु जीवाद्भिन्नो ज्ञेयः परमात्मैव द्युपृथिवीप्रभृतीनां सर्वेषामायनमिति। किञ्च "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान" इत्यपि तत्रोक्तम्। एवञ्च तथा पूर्वमंत्रे ज्ञातृज्ञेयभावेन परमेश्वरजीवयोर्भेदः प्रतिपादितस्तथा प्रकृतमन्त्रे सेव्यसेवकभावेन भेदः स्पष्टरूपेण प्रदर्शितो भवति। ततश्च जीवपरमेश्वरयो र्भेद-व्यपदेशात् परमात्मैव द्युपृथिव्यादीनामायतनं भवति नतु जीवस्य तादृशायतनत्वमिति भावः ॥५॥

तरह जीव में नहीं उसी तरह परमात्मा में रहनेवाला जो द्यु पृथिव्याद्यायत-नत्व धर्म है, वह भी जीव में नहीं है। अतः परमात्मा ही द्युभ्वादि का आयतन है। जीव अथवा प्रधान द्युभ्वादि का आयतन नहीं।

और भी देखिए, "समाने वृक्षे पुरुषोनिमग्नोऽनीशयाशोचतिमुह्यमान" "जुष्टं यदापश्यत्यन्यमीशमस्य महीमानमितिवीत शोकः" [पुण्यपाप के फल भोग का आयतन लक्षण शरीर रूप वृक्ष पर अधिष्ठित यह जीव अनीशता के कारण मुग्ध होकर के कर्त्तव्य विवेक रहित होकर सर्वदा शोक को प्राप्त करता है। परन्तु जब जन्मान्तरीय प्रबल पुण्योदय के बल से स्वभिन्न परमात्मा का सेवन करता हुआ भगवान् को जानता है, तब वह सेवक सर्व शोक से निवृत्त हो जाता है"] इत्यादि श्रुतियों से जीव परमात्मा में सेव्य सेवक भाव सिद्ध होता है, और यह सम्बन्ध भेद सापेक्ष है। अतः भेद व्यपदेश होने से जीवात्मा द्यु पृथिवी प्रभृति का आयतन नहीं है पर सर्वेश श्रीराम ही तदायतन हैं ॥५॥

प्रकरणात् ।१।३।६।

"कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातम्" [मु० १।१।३।] इति प्रकृत्य 'अथ परा यया' इत्यादि परप्रतिपादकं प्रकरणमारभ्यते । अतः परमात्मैवात्र द्युपृथिव्यादीनामायतनम् ॥६॥

विवरणम्–ननु न केवलं भेदव्यपदेशादिहेतुभिरेव प्रकृते द्युभ्वादीनामायतनरूपेण भगवान् श्रीरामः प्रतिपादितो भवति. किन्तु प्रकरणप्रमाणेनापि पृथिव्यादीनामाश्रयतया परमात्मन एव ग्रहणं भवति. नतु जीवविशेषस्य हिरण्यगर्भादेरचेतनस्य वा ग्रहणं भवतीति प्रतिपादयितुं तदेव प्रकरणं दर्शयितुमुपक्रमते "कस्मिन्नुभगव" इत्यादि हे भगवन् कस्मिन्नेकस्मिन् पदार्थे विज्ञाते. श्रवण, मनन, सहकृत सहकारेण विशेषतया विज्ञानविषयीकृते सति, इदं परिदृश्यमानं स्थावरजंगमात्मकं सर्वपदार्थजातं विशेषरूपेगविज्ञायमानं भवतीति. समुपक्रम्य, तादृश पदार्थस्य निर्वचनं कर्तुम्, अपर विद्या प्रतिपादि-

तद्विषयः कर्त्तव्यः। एवं छान्दोग्यश्रुतौ श्रूयते। तत्र हृदयपुण्डरीक मध्ये योऽयं सूक्ष्माकाशः स किं भूताकाश आहोस्वित् प्रत्यगात्मा जीवः सर्वसमर्थः सर्वत्र सर्वोपास्य परमात्मावेति संशयो जायते। यत आकाश शब्दः स्वभावत एव भूताकाशस्य समुपस्थापकः। भोगाधिष्ठानशरीरान्तरे विद्यमानत्वात् शरीरस्वामिनो जीवस्योपस्थितिर्जायते. प्रकरणपर्यालोचनया च परमात्मा समुपस्थितो भवति. इति सर्वेषां पूर्वोक्तानामुपस्थापकसद्भावाद्भवति संशयः। स्थाणुर्वा पुरुषो वेत्यत्रोच्चैस्तरत्ववदिति। तत्राकाशपदस्य भूताकाशेऽतिप्रसिद्धत्वात् प्राप्त एव भवति भूताकाशः। अथवा देहात्मकगृहस्वामित्वा-परमात्मा है। ऐसा संशय होता है। क्योंकि इन दोनों का उपस्थापक वाक्य है। इसमें पूर्वपक्षवादी कहते हैं कि इसमें आकाश शब्द भूताकाश में अत्यन्त प्रसिद्ध—रूढ़ है। इसलिए भूताकाश का ही इस प्रकरण में उपदेश किया गया है। आकाश पद का उच्चारण करने से अति शीघ्रतया भूताकाश ही प्रतीत होता है। इसलिए भूताकाश का ही ग्रहण होता है परमात्मा का नहीं। क्योंकि परमात्मा तो सर्व व्यापक है उसमें सूक्ष्मता किस तरह से हो सकती है। इसलिए प्रकृत में भूताकाश का ही ग्रहण है परमात्मा का नहीं।

इसके उत्तर में कहते हैं "अत्राभिधीयते" इत्यादि इस प्रकरण में दहर पदवाच्य परमात्मा ही है किन्तु भूताकाश अथवा जीव नहीं है। क्योंकि वाक्यशेषगत उत्तर हेतुओं से "अथ यदिदमस्मिन् ब्रह्मपुरे" इत्यादि वाक्य के पर्यवसान में जो अजरत्वामरत्व अपहत पाप्मत्वादिक गुण बतलाया गया

त्प्रत्यगात्मैवात्राकाशपदवाच्यो भवति। नतु परमात्मा यतस्तस्य "ज्यायान् दिवोऽज्यायानाकाशादित्यादिना व्यापकत्वश्रवणेन सूक्ष्मत्वाभावात्, तस्मात्परमात्मनोनात्र ग्रहणं किन्तु भूताकाशस्य जीवस्यैव वा ग्रहणमिति पूर्वपक्षः। अत्राहाचार्यः–"अत्राभिधीयते' इत्यादि सूत्रावयवं विस्फोटयन्नेवोत्तरयति. "उक्त वाक्यगतेभ्यो हेतुभ्यः" इत्यादि [उत्तरेभ्यो वाक्यशेषगतकारणेभ्यो दहरशब्देन परमात्मैव गृहीतो भवति नतु स्वभावप्राप्तोपि भूताकाशो जीवोवेति] येभ्यो हेतुभ्यः परमात्मैव परिगृह्यते नो इतरस्तानेव हेतुन् दर्शयितुमाह "ते च हेतवः" इत्यादि "स ब्रूयाद् यावान्वायमाकाशस्तावानेषोऽन्तर्हृदयाकाशः" इयं च श्रुतिर्बाह्याकाशान्तराकाशयोरूपमानोपमेय भावं

है। तथा सत्यसङ्कल्पादिक सत्यकामादिक गुण का कथन किया है। इन गुणों का अचेतन अथवा अल्पज्ञ पराधीन जीवों में तो समावेश नहीं हो सकता है। अतः तादृश गुणवत्वान्यथानुपपत्ति से सिद्ध होता है कि दहर पद वाच्य परमात्मा ही है, भूताकाशादिक नहीं। और उत्तर प्रकरण में यह भी कहा है कि "जितना बड़ा यह आकाश है। उतना बड़ा ही अन्तर हृदयाकाश भी है।" इस प्रकार से उपमानोपमेय भाव का भी प्रदर्शन किया है। यह उपमानोपमेय तो एक में हो नहीं सकता है। क्योंकि सादृश्य भेद घटित होता है। यथा "हरिस्तथाहरिः" इस तरह से सादृश्य नहीं होता है। यद्यपि "गगनंगगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव॥" इत्यादि स्थल में तो एक में भी सादृश्यव्यवहार घटित होता है। तथापि यह साहित्यिकों का अनन्यगतिक विषय है। इसलिए आलङ्कारिक लोग एतादृश स्थल में उपमालंकार नहीं मानकरके अनन्वयालंकार मानते हैं। प्रकृत में जब संभावना हैं तब एक में सादृश्य नहीं हो सकेगा इसलिए परमात्मा हो दहर पदवाच्य है। इस बात को बतलाने के लिए कहते हैं "ते च हेतवो निर्दिश्यन्ते" इति।

दर्शयति. अर्थात् यावत्परिमाणकः प्रसिद्धाकाशस्तावत्परिमाणको हृदयमध्यगताकाशोऽपि. उपमानोपमेयभावश्च सति भेदे संभवति. एकत्वे-तदभावात्। तथाचोपमानोपमेयभावेन भूताकाशस्यावसरोनिवार्यते। अतएव जीवस्यापिनावसरस्तस्याणुत्वश्रवणेन व्यापकत्वधर्मेणोपमानोपमेयभावस्यासंभवादिति परिशेषात् परमात्मैव दहराकाशरूपेण परिगृह्यते। अमुमेवार्थं दर्शयति "इत्यत्रोदीर्यमाण" इत्यादि वाक्येन। न केवलमुपमेयभावेनैवभूताकाशजीवयोर्व्यावृत्तिः संग्रहश्च परमात्मनः किन्तु सत्यसंकल्पवत्वादिका अपहतपाप्मत्वादिका ये धर्माः परमात्मनोऽनन्यसाधारणाः प्रकरणे प्रतिपादितास्तेषां समन्वयोऽपि, परमात्म व्यतिरिक्तेऽन्यथानुपपद्यमाना अर्थतोदहरपदवाच्यतां परमात्मानमेवावगमयन्ति। तानेव धर्मान् दर्शयितुमाह "एवं" "एष आत्माऽपहतपाप्मा" इत्यादि। अयं च परमात्मा पापपुण्यादिदोषरहितः

जिन हेतुओं के द्वारा सिद्ध होता है कि परमात्मा ही दहर पदवाच्य हैं। उन हेतुओं का कथन किया जाता है। "स ब्रूयादित्यादि" "वह कहे कि जितना बड़ा यह लोक सिद्ध आकाश है उतना ही बड़ा अन्तर हृदयाकाश भी है।" इत्यादि स्थल में कथित जो उपमानोपमेय भाव है वह दहराकाश तथा भूताकाश की एकता में संभवित नहीं हो सकता है। इसलिए यह दहराकाश भूताकाश से भिन्न है। और वह दहराकाश परमात्मा है। भूताकाश उपमान है, नतु भूताकाश ही परमात्मा है। 'मुखंमुखम्' इस तरह उपमानोपमेय भाव नहीं होता है। किन्तु चन्द्रमुख में भेदहरने पर "चन्द्रवन्मुखम्" इस रूप से उपमानोपमेय भावलोक सिद्ध है। जब तक कोई विशेष न हो तब तक सादृश्य अभेद में होना अनुभव विरूद्ध है।

दहराकाश परमात्मा ही है। इसमें वृत्तिकार युक्त्यन्तर भी बतलाते हैं "एवं स एव आत्मा" इत्यादि। यह आत्मा अपहतपाप्मा है, यहाँ

इत्यारभ्य "सत्य सङ्कल्पः सत्यकामः" इत्यन्ताश्रुतिर्निरूपाधिकान् स्व स्वभावतः प्राप्तान् नतु स्फटिकारोपितकुसुमगुणानिवान्यारोपितान् गुणराशीन् प्रतिपादयन्ती परमात्मैवात्र दहर पदवाच्योनान्य इति कथयति । नहि भूताकाशे चेतनत्वेप्यत्यल्पसामर्थ्यशालिनी जीवेवा समुदाहृतगुणानां कदाचिदपि समावेशसंभावनेति । "विषयवाक्ये" इत्यादि । विषयवाक्ये "अथ यदिदमस्मिन्" इत्यादि । मूलवाक्ये यत् "तदन्वेष्टव्यन्" इति विद्यते. तद्घटकतत् शब्देन दहराकाशस्य परमात्मनः तथा तादृशपरमात्मनिष्ठगुणानां सत्यसङ्कल्प सत्यकामादिक अपहतपाप्मत्वादिकानामनन्यसाधारणानां परामर्शं कृत्वा परमात्मनः परमात्मगुणानां चान्वेषणं कर्त्तव्यमित्यर्थो ज्ञातव्य इति । अत्र प्रकरणे यद्विशेषवक्तव्यं तत्. भाष्यादिसाम्प्रदायिकग्रंथेभ्य एवावलोकनीयमिति स्वयमेववृत्तिकारो विनिर्दिशति "विस्तरस्तु" इत्यादि ।

से लेकर "सत्य संकल्पः सत्यकामः" यह सत्य संङ्कल्पवाला है, सत्यकाम हैं । एतत्पर्यन्त श्रुति निरुपाधिक अर्थात् अनन्य साधारण अप्राकृतिक लोकोत्तर अपहतपाप्मत्व सत्यसङ्कल्प सत्य कामादिक अनेक कल्याण गुण दहराकाश में हैं इस बात का कथन करती है। तो एतादृश श्रुति का कथन तभी उपपन्न हो सकता है जबकि दहरपदवाच्य परमात्मा को मान लिया जाय। अन्यथा श्रुति स्वार्थ से प्रच्युत होकर निरालंबन होती हुई अप्रामाणिक हो जायगी। श्रुतियों का अप्रामाण्य किसी को भी इष्ट नहीं है। अतः विषय वाक्य में आगत जो दहर पद है, वह प्रकरण पर्यालचनसे परमात्मपरक है यह निश्चित होता है। ऐसा हुआ तब "अथ यदिदमस्मिन् ब्रह्मपुरे" इत्यादि विषय वाक्य में "तदन्वेष्टव्यम् यह वाक्य । है उसमें तत् शब्द से आकाश को तथा तादृश आकाश के अन्तरवर्ती जो अनन्त कल्याण गुण हैं, उसका परामर्श करके हृदयान्तवर्ती आकाश तथा तन्निष्ठ जो गुण हैं इन दोनों का अन्वेषण तथा उन दोनों की विशेष

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गञ्च ।१।३।१५।

'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढ़ाः' [छा०८।३।२।] इति श्रुतिनिर्दिष्टयाऽहर्दिवं गच्छन्तीनाम्प्रजानां गत्या ब्रह्मलोकशब्देन च दहराकाशपदवाच्यः परमात्मेत्यवगम्यते । तथा हि दृष्टं श्रुत्यन्तरे सुषुप्तिसमये प्रजानामहर्दिवं

आकरजगद्गुरुश्रीरामानन्दाचार्यकृतश्रीसम्प्रदायसर्वस्वभूतं ब्रह्मसूत्रानन्दभाष्यम् । एतत्प्रकरणीयरहस्यंतत्रावलोकनीयमित्यर्थः ।।१४।

विवरणम्—इतः पूर्वसूत्रे दहरपदवाच्यः परमात्मा कुतः उत्तरेभ्यो हेतुभ्यः. इति कथितम् । तानेवोत्तरहेतून् विशेषतो दर्शयितुं प्रकृत सूत्रस्य प्रवृत्तिरिति दर्शयति "इमाः सर्वाः प्रजा" इत्यादि । अमुमेव दहराकाशं परमात्मानं प्रकृत्य श्रुतिः कथयति । तत्र प्रात्यहिकगत्या शब्देन च दहराकाशस्य परमात्मस्वरूपतामेव द्रढ़यति । तथाहि "अस्यै ते सत्याः कामा अनृतापिधातास्तद् यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं नविन्दन्त्यनृतेन हि प्रत्यूढ़ाः [छा०८।३।२।] [अस्य दहराकाशस्यैते सत्याः कामा सत्यसंकल्पा-

रूपसे जिज्ञासा भी करनी चाहिए यह फलित होता है । इसलिए दहराकाश पद का वाच्य सर्वोपास्य परमात्मा ही है । ननु आपातप्राप्त भूताकाश अथवा जीव यह सिद्ध हुआ । इस विषय पर विशेष विचार आनन्दभाष्य विवरण में देखें ॥१४॥

सारबोधिनी—"दहर उत्तरेभ्यः" इस सूत्र में कहा गया कि दहर पदवाच्य परमात्मा है । क्योंकि वाक्यशेषगत प्रतिपादित हेतु से उन्हीं उत्तर हेतुओं को बतलाने के लिए उसी सूत्र का विस्तार रूप से प्रतिपादन कर ने के लिये तथा शब्दादी का प्रदर्शन और सुत्र व्याख्यानहेतु उपक्रम करते हैं "ईमाः सर्वा प्रजा ईत्यादि । [ये परिदृश्यमान सर्व प्रजा मनुष्यादि वर्ग

गमनं परमात्मनि भवति । 'एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति सम्पद्य नविदुः सति सम्पद्यामह इति" [छा०६।७।२।] इति । ब्रह्मलोकशब्दोऽपि च तथा परमात्मनि प्रयुक्तो दृष्टः 'ब्रह्मलोकः सम्राडिति होवाच' [बृ०४।३।३३।] इति । इदमेव च दहराकाशस्य परमात्मत्वे लिङ्गम् ॥१५॥

दिका. अनृतेन तिरोहितगुणेनाच्छन्नासन्तो नैनं प्राप्ता भवन्ति अकृततपोभिः प्रतिदिनमिमाः प्रजाः सुषुप्तिसमये दहराकाशात्मक परमात्मानं प्राप्यापिनैव जानन्ति यदहं ब्रह्मलोकसंप्राप्तवानस्मीति तदाहुरानन्दभाष्यकाराः-"यतोऽनृततिरोहितापहतपाप्मत्वादिगुणविशिष्टात्मस्वरूपा अत एव ताः प्रजास्तत्समीपं गत्वाऽपि तं न पश्यन्ति" (आनन्दभाष्य १।३।१५) इति ।

कुतः यतस्ते गन्तारः कर्मपराधीनाः कर्मात्मकावरणेनावृतबुद्धयो न जानन्ति दहराख्यं परमात्मान मिति । इयं श्रुतिः प्रतिदिनं प्रजानां दहराकाशात्मकपरमात्मलोके गमनं दर्शयति । ततश्चैतादृश गत्या तथा ब्रह्मलोकशब्देन च दहराकाशस्य परमात्मत्वं प्रसिद्ध्यति । एतामेव श्रुतिमभिलक्ष्य सूत्रकारोऽकथयत् "गतिशब्दाभ्यामिति । "अहरहर्गच्छ-

सुषुप्ति के समय में प्रतिदिन जाकर के परमात्मा को प्राप्त करके भी उस परमात्मा को नहीं समझ पाती कि हम ब्रह्म संपन्न अर्थात्प्राप्त कर गये हैं । क्योंकि यह सब प्रकर्म लक्षणमन से आवृत अन्तः करणवाली है । तो कर्मात्मक प्रतिबन्धक होने से तादृश ज्ञान नहीं होता है ।] इस श्रुति में कथित जो प्रात्यहिक गति है तथा 'ब्रह्मलोकं न विन्दन्ति' यह जो ब्रह्मलोक शब्द है उससे सिद्ध होता है कि दहर पद वाच्य परमात्मा है । 'इमाः सर्वा प्रजाः' इत्यादि श्रुतियों से प्रदर्शित जो प्रतिदिन जाती हुई प्रजाओं की गति है उससे तथा ब्रह्मलोक शब्द से यह सिद्ध होता है कि दहराकाश पद का वाच्य अर्थ परमात्मा परम पुरूष ही हैं नतु भूताकाशादिक ऐसा अन्य

न्त्यः, इति गत्या तथा "ब्रह्मलोकं न विन्दन्ति" इत्यादि शब्देन च परमात्मनः परमपुरुषस्यैव दहराकाशपदवाच्यत्वं प्रतिपादयति पूर्वप्रकरणे दहराकाशस्यैव प्रक्रान्तत्वात् । तस्माद्दहराकाशपदवाच्यः परमात्मैव भवति. न भूताकाशस्तस्मिन् गतिशब्दयोरदर्शनादिति । परमात्मनि प्रजानां गमनं भवतीति श्रुत्यन्तरेऽपि प्रतिपादितम् तदेव दर्शयति "तथाहि दृष्टं लिङ्गञ्चे"ति श्रुत्यन्तरे सुषुप्तिकाले प्रजानां गमनं परमात्मनि भवतीति प्रमाणमाह "एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामाहे इति" । [एवमेवं पूर्वोक्तरूपेणैवेहापि हे सोम्य श्वेतकेतो ! इमाः परिदृश्यमानाः जाग्रत् कालिकाः सर्वाः प्रजाः मनुष्याः सुषुप्तौ सति परमात्मनि संपद्य तदेकतां प्राप्यापि नैवं जानन्तियद्वयं सत्यात्मनि संपन्ना इति ।] अनेन प्रकारेणान्यत्रापि सत्संपत्तिं प्रजानामनुशास्ति । तथा ब्रह्मशब्दस्य परमात्मनि प्रयोगो भवतीति जनकयाज्ञवल्क्यसंवादे "ब्रह्मलोकः सम्राडिति होवाच" इति प्रकरणे दृश्यते एतच्च प्रकरणं दहराकाशस्य ब्रह्मत्वं परमात्मरूपतायां च लिङ्गं भवति । अनेन क्रमेण गति शब्दाभ्यां सिद्धं भवति. यत् दहराकाशपदवाच्यः परमात्मा भवति. नतु भूताकाशः यतः प्रदर्शितोपपत्तीनां भूताकाशेऽसंभवात्. संभवाच्च परमात्मनीति दिक् ॥१५॥

श्रुति में भी कहा है कि सुषुप्ति के समय में प्रतिदिन प्रजाओं का गमन परमात्मा में होता है । "एवमेव खलु सोम्येमाः" इत्यादि हे सोम्य इसी तरह यह सब प्रजा प्रतिदिन सुषुप्ति काल में सत्परमात्मा में संपन्न होकर के भी नही समझती है कि मै सत में संपन्न हुवाहूँ इत्यादि स्थल में कहा गया है। एवं ब्रह्मलोक शब्द दहराकाशात्मक परमात्मा में भी प्रयुज्यमान होता है हे सम्राट् यह ब्रह्मलोक हैं । ऐसा याज्ञवल्क्य ने जनक को कहा इस बृहदारण्यकीय जनकयाज्ञवल्क्य संवाद से सिद्ध हैं । तो यही सर्वलिङ्ग होता है दहरा

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ।।१।३।१६।

श्रुत्यन्तरेऽभिहितस्य 'एष सेतुर्विधरण एषां लोकानामसम्भेदाय' [बृ०४।४।२२।] इति धृतिरूपस्यास्य परमात्मनो महिम्नोऽस्मिन्दहराकाशे "अथ य आत्मा स सेतुर्विधृतिः" [छा० ८।४।१।] इत्युपलब्धेरयं दहराकाशः परमात्मा ।।१६।।

विवरणम्=इतोऽव्यवहितसूत्रेगतिशब्दाभ्यां दहराकाशस्य परमात्म बोधकत्वमेव नतु भूताकाशादिवाचकत्वमिति प्रतिपाद्यातः परंधृत्याख्य कारणेनापि दहराकाशपदवाच्यत्वं परमात्मनः परमपुरुषस्यैवेति दर्शयितुमाह "श्रुत्यन्तरेऽभिहितस्य" 'एषसेतुरित्यादि । 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय" [बृ० ४।४।२२।] [एषः परमात्मा सर्वेश्वरः सर्वेषां मनुष्यादिसर्व देवान्तस्वशरीरैकदेशभूतानामीश्वरः शासको नियमनकर्त्ता न केवलं प्रशाशक एव किन्तु भूताधिपतिः सर्वभूतानामधिपतिरपि तथा एष एव परमात्मा भूतानां सर्वेषां पालको भवति. अयमेव परमात्मा सेतुर्विधारकश्च. एतेषां लोकानां विधारकः असंभेदाय असाङ्कर्यायेति] इत्येवमन्यत्र बृहदारण्यके श्रुतस्यास्य परमात्मनोधृत्याख्यस्य महिम्नोऽस्मिन् दहराकाशे समुपलब्धिर्दृश्यते । अयं च सर्वधारकत्वलक्षणो धर्मो दहराकाशस्य "अथ य आत्मा स सेतुर्विधृतिरेषां लोकानाम

काश को परमात्मारूप होने में अतः सिद्ध होता है कि दहराकाशपदवाच्य परमात्मा हैं ।।१५।।

सारबोधिनी—सुषुप्ति समय में प्रजा ब्रह्मलोक में जाती है इत्याकारक गति तथा 'ब्रह्मलोकं विन्दन्ति' इत्याकारक शब्द द्वारा इससे पूर्वसूत्र में सिद्ध किया गया है कि यहाँ दहर पदवाच्य परमात्मा है किन्तु भूताकाश नहीं। इसके बाद धृत्याख्य हेतु से भी दहर पद परमात्मा वाचक है इस विषय का स्पष्टीकरण करने के लिए सूत्र का उत्थान करते हुए प्रक्रम

संभेदाय" इत्येवमिहापि दहरप्रकरणे दहराकाशे धृतिलक्षणस्य महिम्नः समुपलब्धिदर्शनात् दहराकाशपदवाच्यः परमात्मैव भवति । अत्र यः आत्मा स एव सेतुः सेतुवत्संसारसागरात्पारकर्ता । अयमेव परमात्मा स्वकीयभक्तानां कृते संसारसागरसंतरणस्योपायरूपः कारणरूपोपि भवति तथा स्वयमेव दहरपदवाच्यः परमात्मा प्राप्तव्योपि भवति । तदाहुराचार्यपादाः प्रकृतश्रुतिव्याख्यानावसरे—

"अथ आत्माऽपहतपाप्मत्वादिगुणकः स सेतुरिव सेतुर्विधृतिर्विधारकः । कथमयमात्मा सेतुर्विधृतिस्तत्राह—एषांलोकानामित्यादि । एषां भूरादिलोकानामसंभेदायासङ्कराय सम्भेदः साङ्कर्यम् । तदत्रायमाशयः—यद्ययं सर्वनियामकः परमात्मा स्वकीयशासनेन भूरादिकं जगन्नधारयेत्तदा सर्वधर्माणां साङ्कर्यमेव भवेत् । ततश्च घटधर्मो घटत्वं पटादिष्वपि समवेयात् । पटधर्मश्च पटत्वं घटादि । एवं वह्निधर्मं मौष्ण्यं जलेजलधर्मश्च शैत्यमग्नौ गच्छेत् । ततश्च सर्वापि व्यवस्थोच्छिन्ना स्यादिति व्यवहाराभावः प्रसज्जेत परमात्मनानियन्त्रिता खु सर्वे धर्माः स्वाधिष्ठानं विहायान्यत्रागच्छन्तः सम्पादयन्ति, असंकलतया स्व स्व व्यवहारम्, स्वस्मिन् चिदचिद्वस्तुजातमसंकीर्णं सिनोति वध्नातीति सेतुरिति सेतुपदव्युत्पत्तेः" (आनन्दभाष्यम् ८।४।१) तथैव जगद्गुरु श्रीश्रुतानन्दाचार्या अपि उपेयोपायदर्पणे—"परात्परं पुरुषमुपैतिदिव्य'मिति श्रुतौ । दिव्यो मुक्तजनोपेयो रामो ब्रह्म परात्परम् ॥ स्यन्दमाना यथा नद्यो नामरूपे विहाय च । गच्छन्त्यस्तं समुद्रे वै तथा नाम्नश्च रूपतः ॥ गङ्गेति व्यपदेशो न गङ्गायाश्च तदा भवेत् । कर्मणा-

करते हैं श्रुत्यन्तर में प्रतिपादित जो धृतिरूप धर्म है। एष सर्वेश्वर एष भूताधिपतिरेषभूतपाल एष सेतुर्विधरण एषां लोकानाम् संभेदाया [यह परमात्मा सर्वेश्वर सर्व नियन्ता हैं यह परमात्मा भूतों के अधिपति स्वामी हैं । यह परमात्मा प्रत्येक प्राणियों को पालन करने वाले है । तथा यह

पुरुषो मुक्त उपैति पुरुषं परम् ॥" तथा–उपायो भक्तिरेवास्ति रामप्राप्तौ विनिश्चिता । तत्त्वज्ञानं तदङ्गं चोपार्ज्यं सार्धं स्वकर्मणा ॥ धर्मेण चेतसः शुद्धौ भक्तिप्रितिश्च राघवे । रामध्यानं पराभक्तिः प्रत्यक्षसदृशं हि तत् ॥" "त्वमेवोपायभूतो मे" इत्यादयश्च । तथैवाहुः श्री बोधायनापरनामकश्रीपुरुषोत्तमाचार्यवर्याः–"रामदीनोऽनुकूलोऽहं विश्वस्तोऽप्रातिकुल्यवान् । त्वयिन्यस्यामिचात्मानं पाहि मां पुरुषोत्तम ! ॥ मामनाथं स्वशेषं च न्यासितं स्वार्थमेव हि । निर्भरं स्वभरत्वेन पाहि मां पुरुषोत्तम ! ॥" (श्रीपुरुषोत्तमप्रपत्तिषट्के) "रामप्राप्तावुपायश्च राम एवेति" वदन्तः श्रौतप्रमेयचन्द्रिकाकाराजगद्गुरुश्रीश्रियानन्दाचार्या अपि स्मरणीया अस्मिन् प्रसङ्गे ।

सेतुशब्दस्य लौकिकोप्यर्थः संगति भवति । तदुक्तं गीतायामपि "अनन्येनैव योगेन मां ध्यायन्त उपासते । तेषामहंसमुद्धर्ता मृत्युसंसारसागरात्" इत्यादि प्रकरणेन स्वस्यैवभक्तैरूपेयत्वमुपायत्वं च प्रदर्शितम् । तदुक्तं श्रीवशिष्ठसंहितायाम्–

"श्रुतावुक्तं 'यमेवैष वृणुते' इति रूपतः ।
तव प्राप्तावुपायस्तद्राम ! त्वं चासिनेतरः ॥
उपायस्तव सम्प्राप्तौ त्वामेव वदति श्रुतिः ।
उपायो भवतात् त्वं मे राम ! वेदनिवेदित ! ॥
त्वद्भिन्नोपायशून्यस्योपायस्त्वं राम ! मे भव ।
नित्यानित्यविभूतीशो मुक्तोपेयश्च मुक्तिकृत् ।
आवृत्तिर्नच यत्प्राप्तौ तथ्योपायो मतोहि सः ।
उपेयश्च तथा भूतो राम ! त्वं भवतान्मम ॥

परमात्मा सेतु है। सबको धारणकरनेवाले हैं।]इस प्रकार से परमात्मा का धृतिरूप जो महत्त्व है इस दहराकाश में अथ य आत्मासेतुविधृतिः यह जो परमात्मा है वह सेतु है विधारक है इस प्रकार से धृत्यात्मक महत्त्व की उपलब्धि

प्रसिद्धेश्च ।१।३।१७।

'को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो नस्यात्' [तै० २।७।] 'सर्वाणि हवा इमाणि भूतान्याकाशादेव समुत्पद्यन्ते' [छा०

इत्यादिरूपेण सर्वेश्वर श्रीरामस्तुतिप्रसङ्गे महर्षिवशिष्टविश्वामित्राभ्याम् । तस्माद्धृत्युपलब्धेरत्र दहराकाशपदवाच्यः परमात्मैव भवति. नतु तदन्योभूताकाशादिरिति । अमुमेवार्थं पिण्डीकृत्य वृत्तिकारेण प्रतिपादितम् "श्रुत्यन्तरे" इत्यादिना । तत्र श्रुत्यन्तरे बृहदारण्यकेऽभिहितस्य प्रतिपादितस्य 'एष सेतुर्विधरण एषां लोकानां संभेदाय" इत्यादिप्रकरणेन धृतिरुपस्य धारणकर्त्तृत्वाख्यधर्मस्य परमात्मसंबन्धिमहत्वस्य, अस्मिन्दहराकाशे "अथ य आत्मा स विधृतिः" इत्यादावुपलब्धिदर्शनाद् भवति दहराकाशपदवाच्यः परमात्मेति ।

न च यदि दहराकाशपदेन परमात्मनो ग्रहणे दहरत्वमल्पत्वं कथं स्यात् यतो दहरपरिमाणविरुद्धस्य परममहत्परिमाणस्याकाशादिवदेव परमात्मनि "ज्यायान अन्तरिक्षादित्यादौ श्रुतत्वादिति वाच्यम्. सर्व समर्थस्य परमात्मनः सर्वप्रकारकपरिमाणवत्वस्याविरोधात् । अथवोपासनार्थं तनुपरिमाणवत्वस्यापि परमात्मनि संभवात् । उपासकानां कार्यार्थं ब्रह्मणोरूपकल्पना' इत्यादि श्रुतेरितिदिक् ॥१६॥

विवरणम्=धृत्याख्यपरमात्मनोऽनन्यसाधारणधर्मद्वारा दहराकाशपदवाच्यत्वं परमात्मनि पूर्वसूत्रेण प्रतिपाद्य, सर्वभूतोत्पादकत्वसर्वसंस्थापकत्वसर्वभूतलयकर्त्तृत्व अपहतपाप्मत्वादिकानन्यसाधारणधर्म-

होती है । इसलिए दहराकाशपदवाच्य परमात्मा ही है । तदन्य नहीं तथान्यत्र उपेयोपायदर्पण पुरुषोत्तम प्रपत्ति षट्क आदि पूर्वाचार्यों के अनेक प्रबन्धों में भी परमात्मा को भक्त से प्राप्यतथा प्रापकत्व उपाय उपेय का प्रतिपादन किया गया हैं । इस से भी सिद्ध होता है कि दहराकाशपदवाच्य परमात्मा है १६॥

१।९।१।] इत्यादिष्वाकाशपदं परमात्मनि प्रसिद्धम् । प्रकृतेऽपिचापहतपाप्मत्वादिपरमात्मासाधारणगुणविशिष्टोऽयं दहराकाशः परमात्मैव ॥१७॥

वैशिष्ट्यादपि दहराकाशपदवाच्यत्वं परमात्मन एव संभवति नतु भूताकाशे तत्संभवतीतिप्रदर्शयितुमाचार्य उपक्रमते. परमात्मा साधारणधर्मप्रतिपादकश्रुतिं संगृह्णन् सूत्रव्याख्यानाय 'कोह्येवान्यादित्यादि [को हि प्राणी अनन जीवनक्रियां संपादयेत् को वा प्राणनक्रियां कर्तुं समर्थः स्यात्. यदि कदाचित् एष आकाशः परमात्मा आनन्दस्वरूपो न भवेत्. अर्थात् आकाशपदवाच्यपरमात्मसत्त्वयैव सर्वेषां भूतानां प्राणादिक्रियासंपादिता भवतीत्यत्राकाशपदवाच्यता परमात्मन्येव प्रसिद्धा । तथा "सर्वाणि हवा इमानि

सारबोधिनी=पूर्वसूत्र में धृतिरूप कारण से परमात्मा ही दहरपदवाच्य है ऐसा बतलाया गया है। प्रसिद्धि रूप हेतु से भी दहरपदवाच्य परमात्मा ही सिद्ध होता हैं । क्योंकि आकाश शब्द परमात्मा में प्रसिद्ध है । "आकाशोवैनामरूपयोर्निर्वहिता" इत्यादि स्थल में परमेश्वर में आकाश शब्द का प्रयोग देखने में आता है। जीव में तो आकाश शब्द का प्रयोग कहीं भी देखने में नहीं आता है । यद्यपि भूताकाश में आकाश शब्द की प्रसिद्धि है, तथापि स्व में स्व का उपमानोपमेय भाव नहीं हो सकता है। इसलिए भूताकाश भी दहरपदवाच्य नहीं है किन्तु परमात्मा ही दहरपदवाच्य है। इस प्रकार से प्रसिद्धि द्वारा भी दहराकाश परमात्मा ही है इस बात को बतलाने के लिए आचार्य प्रक्रम करते हैं "को ह्येवान्यात" इत्यादि। "कौन प्राणी अनन जीवन क्रिया का संपादन कर सकता ? तथा कौन प्राणि प्राणनक्रिया का सम्पादन कर सकता यदि यह आकाश आनन्द स्वरूप नहीं होता" । एवं "सब यह परिदृश्यमान आकाशादिक भूतों आकाश से ही उत्पन्न होते हैं आकाश

इतरपरामर्शात्स इति चेन्नासम्भवात् ।१।३।१८।

प्रकरणेऽस्मिन् 'अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' [छा० ८।३।४।] इति वाक्यशेषे इतरस्य सम्प्रसादशब्दाभिहितस्य जीवस्य परामर्शात्स जीव

भूतान्याकाशादेव समुत्पद्यन्ते" यानिमान्याकाशप्रमुखानि भूतानि जड़चेतनात्मकानि तानि सर्वाणि आकाशादेव समुत्पद्यमानानि भवन्ति । इत्याद्यनेकस्थलेषु श्रुतिस्मृत्यादिषु आकाशपदस्य परमात्मनि प्रसिद्धिर्दृश्यते । इहापि प्रकरणे अपहतपाप्मत्वादिगुणो दहराकाशे प्रतिपादितो भवति । ते हि गुणाः परमात्मन एवानन्यसाधारणा इति. अनन्य साधारणपरमात्मगुणानां दहराकाशे प्रतिपादनात् अर्थतः सिद्ध्यति यत् दहराकाशपदवाच्यः परमात्मैव नतु भूताकाशादिस्तस्मिन्नेतेषां परमात्मगुणानां समन्वयस्यासंभवात् । तस्मात्परमात्मैव दहराकाशपदवाच्य इति ॥१७॥

विवरणम्—वाक्यशेषबलेन दहरपदवाच्यत्वं परमेश्वरस्यैव भवति नतु भूताकाशादेरिति पूर्वसन्दर्भेविचारितं, तत्रोच्यते. यदिवाक्यशेषबलेन परमात्मानमुपस्थापयसि तदा तादृशवाक्यशेषबलं तु जीवस्यापि विद्यते एव. तदा दहरपदेन जीवस्यैवोपस्थितिः स एवोपास्यो

में ही समुत्पन्न होकर के अवस्थित रहते हैं, तथा प्रतिसर्ग काल में आकाश में ही प्रलीयमान हो जाते हैं ।" इत्यादि स्थल में आकाशपद परमात्मा में अति प्रसिद्ध है । क्योंकि आकाशादिक भूतों की उत्पत्तिस्थिति तो परमात्मभिन्न से असंभवित है । प्रकृत में भी अपहत पाप्मत्व सर्वधारकत्व अजरत्व अमरत्वादिक अनन्य साधारणानेक कल्याणगुण का वैशिष्ट्य इस दहराकाश में श्रूयमाण है इसलिए दहराकाशपदवाच्य परमात्मा ही हैं जीव अथवा भूताकाश नहीं । अर्थात दहराकाश की परमात्मा में प्रसिद्धि होने से तद्वाच्यपरमात्मा ही है अन्य नहीं ॥१७॥

एव दहराकाशः स्यादिति चेन्न, एतत्प्रकरणगतानां निरूपाधिका-पहतपाप्मत्वादिगुणानां प्रत्यगात्मन्यसम्भवान्नायं दहराकाशः ॥१८॥

भवतु । एतादृशी शंकामपनेतुमसंभवाख्य दोषमनुवदितुं चाचार्यः सूत्र-मुपस्थापयन् प्रक्रमते "प्रकरणेस्मिन्" इत्यादि । अत्र प्रकरणे तादृशी श्रुतिरुपलभ्यते यथा जीव एवोपस्थापितो भवति दहरपदेन नतु परमेश्वर इति । या श्रुतिवाक् जीवस्योपस्थापिका तामेव श्रुतिमक्षरतः पठति "अथ य एषः संप्रसाद" इत्यादि । 'य एष' अत्र एतत्पदेन दहराकाशविषयकज्ञानवानुपासको गृह्यते । स एव सुषुप्ति काले निखिलपापकर्मसम्बन्धस्याभावात् संप्रसन्नो जीव एव संप्रसीदति सुषुप्तिकाले. इति स एव संप्रसादशब्देन विवक्षितो भवति । तादृशो जीवो दहराकाशस्य परमात्मन उपासनया प्रसन्नस्य ब्रह्मणः परमपुरुषस्य प्रसादेन विगतकर्मबन्धनः संप्रसादपदवाच्यो भवति । स एव संप्रसादो जीवविशेषोऽस्मात् पांचभौतिककरणकलेवरा-त्समुत्थाय पुरीतन्नाड्यातादृशकलेवराद्बहिर्निर्गत्यार्चिरादिपथा ब्रह्मलो-कमवाप्य. तत्र परं ज्योतिरुपसंपद्यब्रह्मणः परमपुरुषस्य सामीप्यं

सारबोधिनी—यदि वाक्य शेष बल से दहर इस पद से परमेश्वर का ग्रहण किया जाय तब तो वाक्य शेष बल से संप्रसाद शब्द-वाच्य जीव का भी ग्रहण होना चाहिए दहर पद से । इस शंका का निराकरण करते हुए कहते है कि इस प्रकरण में द्यु पृथिव्यादि सकल जगत् कर्तृत्व सर्व जगदाधारत्वापहतपाप्मत्वादि गुण का कथन किया गया है जो कि स्वभावतः परमेश्वर मात्र में ही रहनेवाले हैं। तो उन अनन्य साधारण गुणों का समन्वय को संभावना तो जीव में नहीं हो सकती है । अतः दहर पद वाच्य परमात्मा ही है जीव नहीं । इस विषय को बतलाने के लिए प्रकरण का उत्थान करते हैं "प्रकरणेस्मिन्नि" त्यादि । इस प्रक्रण में "जो यह संप्रसाद

संप्राप्य परमात्मप्रसादेन स्वेन रूपेण. स्वाभाविकापहतपाप्मत्वादि गुणविशिष्टसच्चिदानन्दस्वरूपेणाभिनिष्पद्यते । अभितः सर्व प्रकारेण निष्पन्नो भवतीति ॥ एतादृशोदीरितश्रुतिवाक्यस्य शेषे इतरस्य परमात्मभिन्नस्य जीवस्य संप्रसादशब्दप्रतिपादितस्य परामर्शात् संग्रहसंभवेन तादृशजीव एव दहरपदवाच्यो भवति । परमात्मनः संग्राहको यथावाक्यशेषस्तथैव जीवस्यापि । अतः वाक्यशेषो जीवमेव दहरपदेन ज्ञापयति तत्कथमुच्यते वाक्यशेषात्परमात्मैव ग्राह्यो भवतीति पूर्वपक्षाशयः ।

तमिममाक्षेपं परिहर्तुमाह "एतत्प्रकरणगताना" मित्यादि । अस्मिन् प्रकरणे श्रूयमाणानां स्वाभाविकानामपहतपाप्मत्व द्युप्रभृतिकसर्वजगदाधारत्वादि अनन्यसाधारणपारमेश्वरधर्माणां कर्ममलावृते प्रत्यगात्मन्यसंभवान्नायं जीवो दहरपदवाच्योऽपितुपरमात्मैव । अयं भावः यद्यपि जीवश्चेतनस्तथापि समुपास्य परमात्मगतान्यविलक्षणानां धर्माणां प्रकरणप्रतिपादितानां समुपासके जीवे सर्वथैव समन्वयाभावात् परमात्मनि च स्वभावत एव समन्वयसंभवात्परमात्मैव दहरवाच्यो

जीव. इस शरीर से पाञ्च भौतिककरणकलेवर समुदाय से उठकर निकलकर परमज्योति ब्रह्मलोक को प्राप्त करके परमेश्वर की कृपा से स्वकीय रूप सच्चिदानन्दादि अभिनिष्पन्न होता है" । इस वाक्यशेष में परमात्मा से भिन्न संप्रसाद शब्द प्रतिपादित जीव का कथन होने से वह जीव ही दहर पदवाच्य है । उत्तर—इस प्रकरण में कथित जो निरुपाधिक स्वाभाविक. परमेश्वर मात्रवृत्ति अनन्य साधारण सर्वाधारत्व सर्वसर्जकत्व अपहत पाप्मत्वादि गुण प्रतिपादित हैं उन गुणों की संभावना कर्ममलावृत जीव में सर्वथैव असंभवित हैं । अतः तादृश गुणों के असंभव होने से दहर पदवाच्य जीव नहीं किन्तु परमात्मा ही है यह सिद्ध होता है । विशेष भाष्य विवरण में देखें ॥१।३।१८॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ।१।३।१९।

अत्राशङ्क्यसमाधत्ते "य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकः" प्रजापतेरित्याद्युत्तरवाक्यादपहतपाप्मत्वादिधर्मकत्वं प्रत्यगात्मनोऽपि सम्भवान्नासम्भव इति चेन्न मोक्षावस्थस्याविर्भूतस्वरूपस्य प्रत्यगात्मनोऽत्र प्रतिपादितत्वात् । अयमाशयः । अनाद्यविद्यातिरोहि-

---

भवति नतु जीवः कुत्र चिद्वाक्यशेषबलप्राप्तोऽपि दहरपदवाच्यो भवतीति निष्कर्षः तदाहुराचार्याः "अतोऽपि सर्वजगद्धारको दहराकाशः परमात्मैव" (आनन्दभाष्यम् १।३।१८) ॥१८॥

विवरणम्="एष संप्रसादोऽस्मात् शरीरात् समुत्थाय" इत्यादि । प्रकरणेन जीवस्य परामर्शदर्शनेन. तस्यैव अपहतपाप्मत्वादिगुण संभवात् दहराकाशपदेन ग्रहणं स्यादित्याशङ्क्य असंभवादिति हेतुना जीवस्य निराकरणं पूर्वसूत्रे कृतम् । परन्तु पुनराशङ्क्यते यत्. उत्तर प्रजापतिवाक्ये तु परमेश्वरधर्माणां जीवेऽपि कथनदर्शनात्

सारबोधिनी-"य एषः संप्रसदा" इत्यादि वाक्य शेष में जीव का परामर्श होने से जीव ही दहराकाश पदवाच्य है इस आशंका को असंभव हेतु से निराकरण किया गया इसके पूर्वसूत्र में । परन्तु वह ठीक नहीं है क्योंकि "य आत्माऽपहतपाप्माविजर" इत्यादि प्रजापति के वाक्य शेष में जीव का प्रतिपादन होने से अपहतपाप्मत्वादि धर्म की संभावना तो जीव में भी हो सकती है । एतादृश शंकाके निराकरण करने के लिए सूत्रोत्थान करते हुए प्रक्रम करते हैं "आत्राशङ्क्य समाधत्ते" इत्यादि । य आत्मा [जो आत्मा अपहत पापवाला है जरा रहित है तथा सर्वशोक रहित है इत्यादि प्रजापति का उत्तर वाक्य है तादृश वाक्य से अपहतपाप्मकत्वादि धर्मवत्ता तो प्रत्यगात्मा जीव में भी संभवति है । तब अपहतपाप्मत्वादि धर्म जीव में असंभव है यह किस तरह से कह रहें है । अतः जीव भी दहराकाश पदवाच्य हो सकता है यह अर्थ सूत्र घटक "उत्तराच्चेत्" पद का

तस्वरूपस्य संसारावस्थस्य जीवस्य परमपुरुषानुध्यानेनोच्छिन्नाविद्यस्य तस्यैव स्वस्वरूपाविर्भावो भवति। एवञ्चायं जीवः प्राक्तिरोहितापहतपाप्मादिरेव मुक्त्यवस्थायामतिरोहितापहतपाप्मत्वादिरूप-

---

जीवेपि ते धर्माः संभवन्तीति दहराकाशपदेन जीवस्य ग्रहणं संभवति तदा कथं तस्यनिराकरणमिति पुनः शङ्कां कृत्वा यो यं पारमेश्वर धर्मों जीवे श्रूयते सतुमुक्ते नतु सर्वसाधारणकर्ममलावृतजीवे। अतो दहराकाशपदेन सर्वसाधरणजीवानां ग्रहणं न संभवतीति-सिद्धान्तं मनसि कृत्वा कथयति "अत्राशङ्क्य समाधत्ते" इत्यादि। एतदेवोपपादयति "य आत्माऽपहतपाप्मा" इत्यादि। [यः खलु आत्मा सर्वपापरहितो जराविरहितो मृत्युधर्मरहितः सर्वशोकरहितश्च] इत्यादि उत्तर प्रजापतिवाक्येनापहतपाप्मकत्वादिपारमेश्वर धर्मवत्वं प्रत्यगात्मनो जीवस्यापि संभवात् कथमसंभवादिति हेतुना दहराकाशपदवाच्यत्वाभाव उच्यते इति चेत्। तत्रोत्तरम्-"आविर्भूत स्वरूपस्तु" अत्र सूत्रे तु शब्दः पूर्वपक्षं व्यावर्तयति। यदत्र होता है। अर्थात् एतादृश पूर्वपक्ष हुआ। इसके उत्तर में सूत्रकार कहते है "आविर्भूत स्वरूपस्तु"तु शब्द पूर्वपक्ष का निराकरण परक है। अर्थात प्रजापति का उत्तर वाक्य मोक्षावस्थ जीवस्वरूप का प्रतिपादनपरक है। जब जीव का स्वकीय स्वरूप आविर्भूत होता हैं मोक्षा वस्था में तब वह जीव अपहत पाप्मा होता है संसारावस्था में नहीं। इसी विषय का स्पष्टीकरण करते हैं प्रजापति के उत्तर वाक्य में जो जीव का कथन है। उसका मतलब यह है कि आविर्भूत है स्वरुप जिसका एतादृश मोक्षावस्थ जो जीव उसी का यहाँ प्रजापति के उत्तर वाक्य में प्रतिपादन हैं। किन्तु कर्ममलावृत सांसारिक जीव का नहीं इसलिए सांसारिक जीव को लक्षित करके असंभव दोष से दहराकाशपदवाच्य का निराकरण किया गया है। जीव संसार काल में अपहत पाप्मत्व नहीं है और मोक्ष में आविर्भूत स्व स्वरूप होता

भाग्भवति । इति निरुपाधिकसार्वदिकापहतपाप्मत्वादिधर्मसम्बन्धो नास्य घटते । दहराकाशस्य तु तादृशधर्मसम्बन्धोऽभिधीयत इति न दहराकाशो जीवः ॥१९॥

जीवेऽपहतपाप्मत्वादिपारमेश्वरधर्माणां कथनं न तत् सामान्यतो जीवमपेक्ष्य किन्तु परमेश्वरोपासनया विमुक्तसांसारिकबन्धनमुक्त जीवमपेक्ष्य प्रतिपादनम् । कर्मबन्धनबद्धजीवेतु तादृशधर्माणां सर्वथा अभाव एव । एतदाशयेनैवाचार्यः पूर्वसूत्रेऽसंभवदोषमवोचत् । मुक्त-जीवेऽपि सर्वे पारमेश्वरधर्मा न संभवन्ति । यतो जगद्-व्यायापारवर्जनादिति सूत्रे तथा दर्शयिष्यति । अतः प्रजापति वाक्यस्य प्रकारान्तरेणापि समन्वयसंभवात्, दहराकाशपदवाच्यत्वं स्वभावतो न साधारणजीवस्य किन्तु मुक्तजीवमभिलक्ष्यैव प्रजापति वचनमिति सैद्धान्तिकी स्थितिः । एतदेवविस्पष्टरूपेण वृत्तिकारः प्रदर्शयति "मोक्षावस्थस्येत्यादि । प्रजापतिवाक्ये यज्जीवप्रतिपादनं न तत्सर्वसाधारणजीवाभिप्रायेणापितु परमेश्वरोपासनयाऽविर्भूतस्व

हैं अतः तदभिप्रायक प्रजापति का वाक्य है इसबिषय का स्पष्टीकरण करते हुए वेदान्त रहस्य को बतलाने के लिए कहते हैं अयमाशयः प्रजापति के उत्तरवाक्य प्रकरण का यह आशय है । इत्यादि । तथाहि अनादि जो अविद्या अर्थात् पूर्वपूर्वतराशुभ कर्मजाल तादृश कर्मजाल से आवृत है स्वकीय स्वरूप जिसका यहाँ अविद्या शब्द का अर्थ है अनादि कालिक कर्म समुदाय । ननु अनादि अनिर्वचनीय ज्ञाननिरस्य भावात्मक अज्ञान विशेष परमत सिद्ध वस्तु विशेष क्योंकि एतादृश अज्ञान विशेष अविद्या में कोई ऐसा प्रमाण भी नहीं कि जिस से वह सिद्ध हो सके तथा पूर्व पूर्वतर श्रीसंप्रदाय के आचार्यों को अभिमत भी नहीं है । एतादृश संसारावस्थ जीव को परम पुरुष भगवान् श्रीराम जी के आराधना करने से अविद्या नष्ट हो गई हो तादृश भाग्यशाली जीव को ही स्वस्वरूप का आविर्भाव

स्वरूपस्य मुक्तावस्थस्य जीवविशेषस्यैव तत्र प्रतिपादनात् । अत्र समस्त प्रकरणस्याभिप्रायं साररूपेण दर्शयितुमाहाचार्यः "अयमाशयः" इति वृत्तिः । अनादिकालिकी पूर्वपूर्वतराद्यनेकभवोपार्जितकर्म संबन्धेन तिरस्कृतस्वकीयासाधारणधर्मकस्य हीनामध्यमोत्तमसंसारासक्तस्य जीवस्य प्रत्यगात्मनः प्राक्तनशुभकर्मोदयादाराधितपरमपुरुष प्रसादेन विनाशितदुरितकर्मजालस्य तथाविधजीवस्य परमपुरुष प्रसादेनैव स्वकीयवास्तविकस्वरूपस्याविर्भावो जायते निष्पीडनेन-तिलेषुतैलवदिति । ततश्च स जीवः पूर्वं यद्यपि तिरोहितापहतपाप्मा, तथापि मोक्षावस्थायामतिरोहितोपहतपाप्मस्वरूपं निघृष्टादर्शे निर्मलप्रतिबिंबवत् प्राप्नोति । कारणवशात् तिरोहितस्वरूपोऽपि परमेश्वराराधनेन पुनः स्वस्वरूपं प्राप्नोति । अतो जीवस्य निरूपाधिकापहतपाप्मत्वादिधर्मैः संबन्धो न भवति । एतस्मादेव कारणात सर्वसाधारणतया जीवो दहरपदवाच्यो न भवति किन्तु स्वभावतोविगत

होता है तब पहले यद्यपि तिरोहित अपहत पाप्मादि गुणवाला था तथापि मोक्षावस्था में अतिरोहित अपहत पाप्मत्वादि स्वरूपता हो जाता है। इसलिए निरुपाधिक सार्वकालिक जो अपहतपाप्मत्वादिक गुण तादृश निरुपाधिक धर्म का संबन्ध जीव को घटित नहीं होता है और दहरकाश में तो निरुपाधिक तादृश अपहत पाप्मत्वादिक धर्म का कथन किया गया है। इसलिए दहराकाशपदवाच्य जीव नहीं है। किन्तु दहराकाशपदवाच्य परमात्मा ही है। यह वृत्त्यक्षर का अनुवाद है। यहाँ का अभिप्राय यह है कि यद्यपि जीव में अवस्था विशेष में तो अपहत पाप्मत्वादि गुण विधेय रूप से है परन्तु जीवत्वावच्छेदेन नहीं है। संसारावस्था में जीवत्व है। तादृश धर्म नहीं है और बाधक कोई नहीं हो तो उद्देश्यतावच्छेदक व्यापकता विधेय में होता है ऐसा नियम है। अन्यथा जब लक्षण द्वारा लक्ष्य का इतर भेदानुमान करेंगे तो उस अनुमान में भागासिद्ध हो जाता

अन्यार्थश्च परामर्शः ।१।३।२०।

दहरविद्यायां "अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय" [छा० ८।३।४।] इत्यादिना जीवपरामर्शस्तु दहराकाशपदवाच्यपर-

---

मलोऽति स्वच्छः परमात्मैव दहराकाशपदवाच्यो भवति। मुक्तजीवेऽपि सर्वे परमेश्वरगुणानागच्छन्ति, किन्तु संभावितानामल्पीयसामेव गुणानां मुक्तौ प्रादुर्भावस्य शास्त्रे प्रतिपादनात्। जगद्व्यापारवर्जमिति सूत्रे तद्वृत्तिभाष्यादौ तथैव दर्शनाच्च तथा च श्रीबोधायनवृत्तिकाराः श्रीपुरुषोत्तमाचार्याः "जगद्व्यापरवर्जं समानो ज्योतिषा" (बो.वृत्तिः) इति ॥१९॥

विवरणम्== ननु यदि प्रकृत प्रकरणे परमात्मन एव ग्रहणं भवति, तदा दहरवाक्यसेषे "अथ य एष संप्रसादः" इत्यादिना यो जीवस्य परामर्शः कृतः तथा प्रजापति वाक्ये 'एष सम्प्रसादः' इत्यादिना च यो जीवस्य परामर्शः कृतः सर्वथा निरर्थक एवस्यादित्याशङ्क्य. अन्यार्थो यं जीवपरामर्शो नतु जीवस्य परामर्शकः किंतु परमात्मनः स्वरूपस्यैव बोधकः। यतः संप्रसादशब्दप्रतिपादितो जीवात्मा जागरिताद्यवस्थायां करणकलेवरादीनामध्यक्षो भूत्वा जाग्रत्कालिक वा-

है। तो यहां जीवत्व सामानाधिकरण्य को लेकर के यत् किंचित् मुक्तावस्था में तादृशवत्ता को लेकर के पूर्वपक्षी का पूर्वपक्ष हुआ था। उत्तरवादी ने उद्देश्यतावच्छेदैक व्यापकता तो विधेय में होता है। इस नियम को ध्यान में रख करके उतर दिया कि जीवत्व धर्म तो सांसारिक जीव में है उसमें तादृश धर्म नहीं है। इस विषय पर विशेष विचार अन्यत्र होगा ॥१९॥

सारबोधिनी—यदि आप दहरपद वाच्यता परमेश्वर में ही मानते हैं तब वह दहराकाश वाक्य में जो "अथ य एष संप्रसादः" जो यह कर्मफल भोक्ता संप्रसाद जीव जाग्रत कालिक शरीर से समुत्थित होकर के परमज्योति परमात्मा को प्राप्त करके स्वरूप से अभिसंपन्न होता है।

मात्मन उपासनेन तदुपसम्पत्त्या परमात्मनोऽपहतपाप्मत्वादिकल्याणगुणवन्मुक्तात्मनोऽपि 'अपहतपाप्मत्वादिगुणवत्तयास्त्ररूपाविर्भावो भवतीत्येतदुपदेशायैवेति ॥२०॥

सना निर्मितान् पदार्थान् स्वप्नतोऽनुभवं कुर्वन्. अत्यर्थं श्रान्तः सन् श्रमापनुत्तये शरणमन्विष्यमाण उपरुपाच्छरीराभिमानात्समुत्थाय सुषुप्तिसमये परमज्योतिः शब्दशब्दितं परमात्मानमुपसंपद्य जाग्रत्कालिकं सर्वाभिमानं परित्यज्य स्वकीयेन पारमार्थिकस्वरूपेण निष्पन्नो भवति । ततश्च यत् परमज्योतिरस्य जीवस्योपसंपत्तव्यं येन च स्वरूपेणायं जीवोभिनिष्पद्यमानो भवति. स एव परमात्मा अपहतपाप्मत्वादिविविधकल्याणगुणको जीवेन समुपासनीयः । एतदर्थमेव दहरवाक्यशेषे प्रजापत्तिवाक्ये च जीवस्य परामर्शः कृतोऽतो न तस्य वैयर्थ्यं शङ्कनीयमिति कथयन्ति परमेश्वरवादिनः । एतत्सर्वं मनसि कृत्वा प्राह "दहरविद्यायामित्यादि" दह-

एतादृशार्थक वाक्य में जीव का परामर्श है । वह तथा प्रजापति वाक्य में जो जीव का प्रस्ताव है वह और मोक्षावस्था में जो आविर्भूत स्वरूप का उपदेश किया गया है ये सब तो निरर्थक होता हुआ श्रुति में भी अविश्वास का उत्पादक हो जाता है, तो इनकी क्या गति होगी ? यदि दहराकाश से परमात्मा का ग्रहण करते हैं ? इस प्रश्न के उत्तर में कहा कि यह जीव का उपदेश जीव परामर्शपरक नहीं है, किन्तु जिसके उपासना करने से जीव एतादृश गुण विशिष्ट होकर परमात्मा को प्राप्त करता है । तादृश अनन्त कल्याण गुण विशिष्ट परमात्मा का बोधक है । जिस परमात्मा की कृपा से हीनदीन जीव भी एतादृश गुणक होता है, एतादृश अभिप्राय को लेकर प्रकरणार्थ का उपपादन करने के लिए सूत्र का उत्थान करते हुए कहते हैं "दहरविद्यायामि" त्यादि । दहर विद्या के प्रकरण में "अथ य एष

रविद्या प्रकरणे "अथ य एष संप्रसादः" [य एष शुभाशुभकर्मफलभोक्तासंप्रसादो जीवः परिदृश्यमान शरीरात्कलेवरान् समुत्थाय शरीरात् गताभिमानः सुषुप्त्युन्मुखः सुषुप्तिकाले उपसंपद्य परमात्मानमुपसंद्य स्वकीयपारमार्थिकरूपेण सम्पन्नो भवतीति ।] इति वाक्ये शरीरसंबन्धेन जीवः सूचितो भवति तथा प्रजापति वाक्येऽपि "एष संप्रसादः" इत्यादिना स एव जीवः समुपस्थापितो भवतीत्यादि वाक्यानां गतिः का परमेश्वरपरिग्रहे । तदत्र योऽयं जीवस्य परामर्शः स न जीवाभिप्रायेण किंतु दहराकाशपदवाच्यपरमात्मनः समुपासनेन परमेश्वरस्वरूपसंप्राप्त्या यथा परमात्मनि कल्याणगुणाः अपहतपाप्मत्वादिकाः सन्ति तद्वदेव परमेश्वरमुपसम्पन्नस्य मुक्तजीवस्याऽपितेऽलौकिकागुणा भवन्ति, इति तादृश गुणवत्त्वेन तस्याऽपि स्व स्वरूपाविर्भावो भवतीत्येतदुपदेशपरत्वेनैव जीवस्योभयत्र परामर्शः संप्रसादः" जो यह संप्रसाद जीव इस शरीर से समुत्थित होकर के परम ज्योति को प्राप्त करता है । इत्यादि वाक्य में तथा प्रजापति वाक्य में जो जीव का कथन किया गया है, वह दहराकाशपद से वाच्य जो परमात्मा जिस परमात्मा के उपासना करने से परमात्मा को प्राप्ति हो जाने से, परमात्मा में जिस तरह अपहत पाप्मत्वादि अनन्त कल्याण गुण हैं, उसी तरह से निर्गत है जन्मजरादिक जिसमें एतादृश मुक्तिदशापन्न जीवात्मा को भी अपहत पाप्मकत्वादि धर्माधिकरणता रूप से स्वरूप का आविर्भाव हो जाता है। इस बात का उपदेश करने के लिए दहरवाक्य तथा प्रजापति वाक्य में जीव का कथन सार्थक होता है । वे सव वाक्य अप्रामाणिक नहीं होते हैं । यद्यपि जीवमात्र "ममैवांशोजीवलोके" इत्यादि स्मृति तथा, अंशोनानाव्यपदेशादित्यादि सूत्र से भगवान् का अंश है । भगवान् अंशी है । तथापि जीव कर्ममल से आवृत रहता है । इलिए जीव में विलक्षण इन गुणों का प्रत्यक्ष नहीं होता

अल्पश्रुतेरिति चेत्तदुक्तम् ।१।३।२१।

नन्वेवमप्यल्पश्रुतिर्दहरविद्यायां "दहरोऽस्मिन" इत्यादिनोक्ताणुपरिमाणके जीव एव सङ्गच्छत इति चेन्न । अत्र विषये "अर्भकौकस्त्वा" [ब्र० सू० १।२।७।] दिति सूत्रे परमात्मनोऽप्युपासनार्थमल्पपरिमाणकत्वं सम्भवतीत्युक्त समाधानमिहापि परिज्ञेयम् ॥२१॥

कुत इति तदाहुराचार्याः "तदेवं दहरप्रजापतिवाक्ययोः कृतानां जीवपरामर्श स्वरूपोपदेशतद्व्यवहारोपदेशानामन्यार्थत्वेनापक्षीणत्वे न दहराकाशस्वरूपसमर्पकत्वमिति दहराकाशः परमात्मैव" (आनन्दभाष्यम् १।३।२०) इति ॥२०॥

विवरणम्— ननु प्रकृते दहराकाशपदेन यदि परमात्मन एव ग्रहणं भवति. तदा "दहरोऽस्मिन्नन्तराकाशः" इत्यादि श्रुत्याल्प परिमाणवत्वं श्राव्यते । न चाल्पपरिमाणवत्वं परमात्मनि सम्भवति "ज्यायान् पृथिव्या" इत्यादिना परमात्मनो व्यापकश्रवणात् है और जब वही जीव भक्ति प्रपत्ति द्वारा संसार प्रयोजक कर्ममल को सर्वतः परित्याग करके मुक्त होकर भगवान् श्रीरामचन्द्रजी का दिव्य श्रीसाकेत धाम को प्राप्त कर जाता है तब उसमें निर्दिष्ट कल्याण गुण उपास्य के अनुकंपा से प्राप्त हो जाते हैं । एतदभिप्रायक प्रजापति वाक्य है। ॥२०॥

सारबोधिनी—दहराकाश पद से परमेश्वर का ही ग्रहण होता है जीव का नहीं। ऐसा "अन्यार्थश्चपरामर्शः" एतत्सूत्र पर्यन्त सूत्रों से विचार किया गया है। क्योंकि परमेश्वर के अनुकूल ही प्रकरण तथा वाक्य हैं। परन्तु, "दहरोऽस्मिन्नन्तराकाश" इत्यादि श्रुति से तो अल्प परिमाण तथा हृदयान्तर्गतत्व का उपदेश किया है। तो अल्प परिमाणवत्ता तथा हृदयादि परिच्छेदतो सर्वव्यापक सर्वानवच्छिन्न परमेश्वर में तो घट नहीं सकता है किन्तु स्वभावतः अणु परिमाणक जीव में ही संभवित है। इसलिए अल्प परिमाण से

इह च श्रूयमाणमल्पपरिमणवत्वं स्वभावतोऽणुपरिमाणकस्य जीवस्यैव संभवतीति परिशेषाज्जीव एव दहराकाशपदवाच्यो भवति नतु परमात्मेति चेन्न. उपासनार्थं परमात्मनोप्यल्पपरिमाणवत्वस्वीकारेऽप्यदोषात् "उपासकानां कार्यार्थं ब्रह्मणो रूप कल्पना" इति श्रुत्युक्तेः। इहापि स्वल्पपरिमाणवत्वेन परमात्मन एव ग्रहणं नतु जीवस्येति दर्शयितुमाहाचार्यः 'नन्वेवमप्यल्पश्रुति" रित्यादि। अन्यार्थश्च परामर्श एतत्पर्यन्तप्रकरणेन परमात्मन एव दहरपदवाच्यत्वस्य निश्चयेऽपि "दहरोस्मिन्नन्तराकाशः" इत्यत्राल्पपरिमाणवत्वं हृदयपरिछिन्नत्वं च ज्ञायते तत्तु स्वल्पपरिमाणके जीवे एव संभवति नतु परमेश्वरे

जीवकाही ग्रहण करना चाहिए परमेश्वर का नहीं। इस शङ्का का समाधान करने के लिए आचार्य प्रक्रम करते हैं "नन्वेमपि"त्यादि दहर विद्या में "दहरोस्मिन्नन्तराकाशः" इस हृदय के मध्य में अल्प परिमाणवाला आकाश है एतादश है तो उससे दहराकाश में स्वल्पपरिमाणवत्व तथा हृदयादि प्रदेश परिच्छिनत्व का प्रतिपादन किया गया है। यह अल्प परिमाणवत्व तो परमात्मा में कथमपि संभव नहीं है। परमात्मा तो सर्वथा व्यापक तथा सर्वपरिच्छेद रहित हैं। एतादश विशेषण द्वय से तो जीव की ही उपस्थिति होती है। क्योंकि जीवतो "एषोणुरात्माचेतसावेदितव्यः" वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः" इत्यादि श्रुति से अल्प परिमाण-वाला है और युक्ति से भी सिद्ध होता है कि जीव अणुपरिमाणवाला ही है। अतः इस प्रकरण में जीव का ही ग्रहण होता है परमात्मा का नहीं। इसके उत्तर में वृत्तिकार कहते हैं "अत्र विषये" इत्यादि। इस विशय में "अर्भकौकस्त्वात्" इत्यादि सूत्र में जो समाधान किया गया है उसी समाधान का अनुसंधान यहाँ भी करना चाहिए। अर्थात् भगवान् स्वभावतः परम-व्यापक हैं परन्तु भक्त के उपर अनुग्रह करने के लिए हृदयादि प्रदेश में भी

अनुकृतेस्तस्य च ।१।३।२२।

अनुकृतिरनुकरणं तत्साम्यमितियावत्तस्य दहराकाशपदवाच्यस्य परमात्मनोऽस्मिन् जीव उपदिश्यते । इत्यनुकार्यस्य परमात्मनोऽनुकर्त्ता जीवोऽभिन्न एवेति निश्चीयते । आविर्भूतगुणाष्टकस्यास्य

संभवतीति चेन्न परमेश्वरेऽपि स्वल्पपरिमाणवत्वसंभवात् । 'अर्भकौकस्त्वा" दिति सूत्रे. उपासनार्थं परमेश्वरस्यापितत्त्वं सम्भवतीति प्रतिपादनादिति वृत्तेर्मुकुलितोर्थः । अयंभावः सर्वतंत्र स्वतन्त्रे भगवति परमेश्वरेऽचिन्त्यरचनाशक्तिमति तस्मिन् सर्वमपि सम्भवति तदा कथैवका स्वल्पपरिमाणवत्वस्येति । 'अणोरणीयान् महतोमहियान्" इत्यादि श्रुत्युक्तेः ॥२१॥

विवरणम्—अनुकृतिशब्दस्यार्थो भवति अनुकरणम् । यथा शिक्षिकानर्तकी नृत्ये यादृशं गात्रे विक्षेपादिकं करोति तत्समानजातीयं गात्रविक्षेपादिकं कुर्वाणाशिक्ष्यमाणा नर्त्तकीगात्रविक्षेपादिकं कुर्वन्ती तामनुकरोतीत्यनुकार्यानुकर्त्रोर्भेदः सुस्पष्ट एव । एवं च प्रकृते मुक्तोजीव आविर्भूतगुणाकष्टः स्वेच्छाविहरणादिना

अभिव्यक्त होते हैं । जैसे शालीग्रामादि शिला में । अतः उपासना के लिए अल्पपरिमाणवत्व तथा देशपरिच्छेदवत्व भी परमेश्वर में संभवित है श्रुति भी कहती है "अणोरणोयान्महतो महियान्" इत्यादि "दैवी ह्येषा गुणमयी मम मायादुरत्यया" इत्यादि स्मृत्यादि से भी सिद्ध होता है कि माया पर्याय स्व अनन्या शक्ति से भगवान् सब प्रकार के हो जाते हैं । अतः अल्प परिमाणवत्व परमेश्वर में संभवित होने से प्रकृत स्थल में दहराकाश पदवाच्य परमात्मा ही है ॥२१॥

सारबोधिनी— दहराकाश पदवाच्य परमात्मा हैं भूताकाश अथवा जीव दहराकाश पदवाच्य नहीं । इस बात को "दहरोत्तरेभ्यः" इस सूत्र से लेकर के "अल्पश्रुतेरिति" इत्यादि सूत्र पर्यन्त प्रकरण से निश्चित किया गया

मुक्तजीवस्य स्वच्छन्दविहरणादिकं परमात्मनोऽनुकरणं श्रूयते। तच्च ब्रह्मसाम्यं बोधयद्दहराकाशाद्ब्रह्मणोऽस्य भिन्नत्वमुपस्थापयति ॥२२॥

परमेश्वरानुकरणं कुर्वन् यथेच्छं विहरतीति परमेश्वरजीवयोः परस्परं भेदः सिद्ध इत्यनुकार्यानुकरणभावात् परमेश्वर एव दहराकाशपदवाच्यो नतु जीव इति दर्शयितुं प्रक्रमते "अनुकृतिरनुकरण" मित्यादि अनुकरोतित्यनुकरणं साम्यं सादृश्यमिति यावत्। अत्र दहराकाशप्रकरणे दहराकाशपदज्ञाप्यस्य परमपुरुषस्य सादृश्यं जीवे उपदिश्यते 'स यथा कामचारोभवती' त्यादिश्रुतिभिः। तत्र साम्यं सादृश्यं संबन्धस्तस्यैकः प्रतियोगो विशेषणम्. एकश्चानुयोगी विशेष्यम्। यथा चन्द्रवन्मुखमित्यत्र सादृश्यप्रतियोगी चन्द्रमा अनुयोगी च मुखं भवति। ततश्च चन्द्रप्रतियोगिकसादृश्यानुयोगिमुखमिति प्रतीतिर्जायते. तद्वत्

है। इसके बाद अनुकरणरूप हेतु से भी जीव तथा दहराकाश पदवाच्य परमात्मा में भेद को सिद्ध करने के लिए जगद्गुरु श्रीरामानन्दाचार्यजो प्रक्रम करते हैं "अनुकृतिरनुकरण" मित्यादि। अनुकृति शब्द का अर्थ होता है अनुकरण तत्समता अर्थात् शादृश जीवात्मा तथा दहरपदवाच्य परमात्मा का सादृश्य कहा गया है। जिस तरह परमात्मा स्वेच्छयाविहरणादिक कार्य करते हैं उसी प्रकार से मुक्तावस्थ जीव में भी स्वेच्छा विहरणादिक होता है। इस प्रकार से जो सादृश्य कहा गया है वह तो दहरपदवाच्य परमात्मा से जीव को भिन्न मानें तब ही हो सकता है यथा चन्द्रवन्मुखं में सादृश्य प्रतियोगी चन्द्रमा तथा सादृश्यानुयोगी मुख को परस्पर भेद रहने पर ही होता है। इसलिए अनुकार्य अर्थात् सादृश्य प्रतियोगी जो दहरपदवाच्य परमात्मा तथा अनुकर्त्ता अनुकरण करने वाला अर्थात् सादृश्य के अनुयोगी जीव में परस्पर भेद है यह निश्चित होता है। और अनुकार्य अनुकर्तृभाव का उपदेश शास्त्र में श्रूयमाण है, इस बात को श्रीवेदान्तजी बतलाते हैं "आविर्भूत गुणाष्टकस्य" इत्यादि

परमात्मनः सदृशमिहापि जीवे कथ्यते इति परमात्मप्रतियोगिक-साद्दश्यानुयोगीजीव इत्याकारको बोधः। साद्दश्यस्य भिन्ने एव वस्तुनि प्रक्रमदर्शनान्मुखचन्द्रवत् । तथा प्रकृतेऽपि परमात्मभेदे जीवे सत्येव परमात्मानुकरणं जीवे समुपदिश्यमानमुपपद्येत नान्यथा तदुपपत्ति-रिति साद्दश्यप्रतियोगिपरमात्मनो भिन्नः साद्दश्यानुयोगिजीवः एतदेव दर्शयति "इत्यनुकार्यस्य" इत्यादि साद्दश्यप्रति-योगिनः परमपुरुषस्य अनुकर्ताऽनुकरणकर्त्ता साद्दश्यानुयोगिजीवो भिन्न एवेति निर्णीयते । यदि दहराकाशपदेन जीवस्य ग्रहणं कुर्यात्तदाऽनुकार्यानुकरणकर्त्रोर्भेदाभावात् साद्दश्य प्रदर्शनं सर्वथैवासंगतं स्यात् चन्द्रश्चन्द्रवदिति । इह च प्रकरणे यस्य जीवविशेषस्यापहतपाप्मत्वादिका अष्टौगुणाः परमपुरुषोपासनेनाविर्भू-तास्तादृशं मुक्तावस्थपरमात्मनानुकरणं श्रूयते । एतच्च ब्रह्मपरमात्म प्रकरण से । श्रीसाकेताधिपति के अनन्य रूप से उपासना करनेवाले जीव को अपहतपाप्मत्वादिक आठ जो कल्याण गुण हैं वे आठगुण मोक्षा-वस्था में जीव में अविर्भूत होते हैं तब वह जीव स्वेच्छया विहरणादिक कार्य करता है "स यदि पितृलोककामो भवति तदा सङ्कल्पादेवपितरः समु-त्तिष्ठन्ते" [यदि वह मुक्त जीवपितृलोक कामनावान् होता है तो सङ्कल्प-मात्र से पितर पितामहादिक वहाँ उपस्थित हो जाते हैं ।] इत्यादि श्रुति-यों में स्वेच्छा विहरणादिक परमात्मा का अनुकरण करता है ऐसा शास्त्र से ज्ञात होता है । तो एताद्दश ब्रह्म की समता साद्दश्य को बतलाता हुआ शास्त्र दहराकाशात्मक परमात्मा ब्रह्म से इस जीव के भेद को उपस्थित करता है । अर्थात् साद्दश्य सर्वत्र भेद घटित ही होता है । जैसे "यथा-गौस्तथा गवयः" जैसे गाय होती है उसी तरह गवय भी होता है, यहाँ गो—गवय संस्थान की समानता लेकर के गोप्रतियोगिक साद्दश्यानु-योगित्व गवय में रहता है. तो गाय और गवय में भेद स्पष्ट है ।

अपि च स्मर्यते ।१।३।२३।

मुक्तात्मनोऽपहतपाप्मत्वादिधर्मकत्त्वं परमात्मनः साधर्म्यमात्र स्मृतिरपि बोधयति । 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः" [गी० १४।२।] इति तस्माद्दहराकाशः परमात्मैव न जीव इति सिद्धम् ।।२३।।

इति श्रीरघुवरीयवृत्तौ दहराधिकरणम् ।।५।।

साम्यं सादृश्यं तदेव सङ्गतं स्यादुभयोर्भेदे सत्येव । ततश्चैतदेव साम्यं दहराकाशवाच्यपरमात्मनः सकाशाद् जीवस्य भेदं व्यवस्थापयति । तस्माद्दहराकाशपदवाच्यः परमात्मैव नतु जीवः कदाचिदपिदहराकाशवाच्यो भवत्यनुपपत्तेः । इत्यनुकृतिरपि हेतुर्दहराकाशस्य जीवभिन्नपरमात्मतामेव बोधयतीति संक्षेपः ।।२२।।

विवरणम्– न केवलं पूर्वोक्तहेतुभिरेव दहराकाशपदवाच्यत्वं परमेश्वरस्य तादृशपरमेश्वरानुकरणं च जीवस्य । अपितु गीतादिष्वपि परमेश्वरानुकरणमवलोक्यते जीवस्येति तादृशपरमेश्वरसाधर्म्यं जीवे दृश्यते । अमुमेवार्थं सुस्पष्टतयाबोधयितुं प्रक्रमते "मुक्तात्मनः" इत्यादि

इसी प्रकार प्रकृत में परमात्मा का स्वेच्छाविहरणादि सदृश स्वेच्छा विहरण जीव में कहा गया है तो यह सादृश्य तब ही घट सकता है जबकि दहर पदवाच्य परमात्मा से जीव भिन्न हो अन्यथा नहीं । अतः अनुकरण श्रवण अन्यथा अनुपपन्न होकर के परमात्मा जो सादृश्य के प्रतियोगी है तथा सादृश्य के अनुयोगीजीव में परस्पर भेद को सिद्ध करता है । तस्मात् दहराकाशपदवाच्य परमात्मा ही है जिनका अनुकरण मोक्षावस्था में आविर्भूत गुणाष्टक जीव करता है ।२२।

सारबोधिनी– केवल पूर्वोक्त प्रकार से ही दहरपदवाच्यतापरमात्मा में तथा तदनुकरणत्व जीव में सिद्ध होता है. इतना ही नहीं गीतादि स्मृति प्रतिपादित साधर्म्य से भी सिद्ध होता है कि दहरपदाच्यता

मुक्तात्मनो मोक्षावस्थजीवस्य परमात्मनोयेऽनन्यसाधारणा अपहतपाप्मत्वादिकागुणाः सन्ति तादृशगुणानां साधर्म्यं मुक्तजीवस्य विद्यते इति गीतादिस्मृतिरपिदर्शयति । स्मृतिवाक्यंपठति "इदं ज्ञान" मित्यादि भगवदुपासनया परमात्मज्ञानं संप्राप्य भगवतः समानधर्मतामासाद्य अनेके जोवात्मानः सर्गे सृष्टौ समुपजायमाना न भवन्ति नवा प्रलयकाले व्यथामेव प्राप्नुवन्तीत्यर्थः । तथैवा हुर्जगद्विजयिनो महामहोपाध्यायजगद्गुरुश्रीरामानन्दाचार्यरघुवराचार्यवेदान्तिनः–"इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य साधनसहित मनुष्ठाय मम साधर्म्यमागताः । 'सोऽश्नुवे सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तै. आ. १।२) 'निरञ्जनः परमं साम्यमुपैति' इत्यादि श्रुत्यनुरोधेन भेदघटितं साधर्म्यं साम्यलक्षणमेवात्र विवक्षितम् । तथा च मत्साम्यमुपागता इत्यर्थः । तथा विधसाधनसम्पन्ना इतेसर्गे जगज्जीवसर्गे नोपजायन्ते नैवोत्पद्यन्ते प्रलयेऽपि च नव्यथन्ति मरणादिव्यथां न प्राप्नुवन्ति जन्ममृत्युदुःखं न प्राप्नुवन्ति

ननु जगत्सृष्टिकालिकोत्पत्तिराहित्येनैव प्रलयेक्लेशाभावः सिद्ध एव पुनः प्रलये नव्यथन्ति चेति वचनं किमर्थमितिचेन्न सर्गानन्तर मनुष्ठितेऽस्मिन् ज्ञानसाधने पुनर्विलयसमयेऽपि दुखाभावस्यानेन बोधितत्वात् । यद्वा सर्गप्रलयशब्दौ जन्ममरणपरौ 'रजसि प्रलयं गत्वा' इत्यादिषु तथा दर्शनात् । प्रलयोऽत्र मरणं तत्समभिव्याहृतसर्गशब्दो जन्माभिधायकस्तथा चोक्तार्थ एव तात्पर्यम् " इति तस्माज्जी-

परमात्मा में ही है । इस बात को बतलाने के लिए प्रक्रम करते हैं "मुक्तात्मन" इत्यादि । परमात्म ज्ञानपूर्वक भक्ति प्रपत्ति द्वारा मोक्षावस्थापन्न जीव को. अपहतपाप्मत्वादि धर्मवत्वात्मक भगवान् का साधर्म्य प्राप्त होता है, इस बात को स्मृति भी कहती है । तथाहि इस परमात्म ज्ञान को आश्रयलेके उपासना द्वारा परमात्मा के अपहतपाप्मत्वादिक को प्राप्त

प्रमिताधिकरणम् ॥६॥

शब्दादेव प्रमितः ।१।३।२४।

काठके "अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूत भव्यस्य न ततो विजुगुप्सते एतद्वैतत् [का० २।४।१२।] इत्याम्नायते । अत्र किमङ्गुष्ठमात्रः पुरुषो जीव उत परमात्मेति संशयः । तत्रा

वस्यसाधर्म्यदर्शनात् दहराकाशपदवाच्यपरमात्मैव भवति नतु जीवस्तथासाधर्म्यकथनमनुपपन्नमेवस्यादिति संक्षेपः ॥२३॥

इति जगद्गुरु श्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्र कृतौ श्रीरघुवरीयवृत्तिविवरणे दहराधिकरणम् ॥५॥

विवरणम् अथ "अस्थूलमनणु" इत्यादि शास्त्रे परमात्मनि परिमाणस्य निषेधात् तथा जीवे च स्वभावतः सर्वभूतादिकं प्रति प्रशाशनस्याभावात् "अङ्गुष्ठमात्र पुरूषः" इत्यादि काठकश्रुतौ उपास्यतया जीवः प्रतिपादितो भवति परमात्मा वेति । यदि ईशानो भूतभव्यस्य इत्यस्य विशेषणत्वेनपरमात्मोपस्थितः स्यात् 'अङ्गुष्ठमात्रः' इत्यस्य च मुख्यत्वेन जीवस्यैवोपस्थितिरिति संशयः तत्र परमात्मा स्वभावतो मानवर्जितस्तथा परमात्मग्रहणे "निश्चकर्ष बलाद्यमः" इत्यादि वाक्यस्यालग्नकतापत्तेर्नात्रपरमात्मोपास्यः किन्तु स्वभावतोल्पपरिमाणवतो हृदयादिस्थानकथनाच्च जीव एव परिगृहीतव्यः । यद्यपि जीवपरिग्रहे ईशानश्रुतिनिरर्थिका इवस्यात् तथापि शरीरादि यत् किं

करके उत्पत्ति प्रलय में जीव व्यथीत नहीं होते हैं । इसलिए दहराकाशपदवाच्य परमात्मा है । क्योंकि साधर्म्य भेद घटित होता है इसका स्पष्टीकरण पूर्व सूत्र में किया है ॥२३॥

॥ इति दहराधिकहणं ॥५॥

सारबोधिनी–"अङ्गुष्ठमात्रः पुरुषो मध्ये आत्मनि" इत्यादि स्थल में सर्वथा प्रमाण रहीत परमात्म परिमाण विशेष की कल्पना नहीं की जा सकती

ङ्गुष्ठमात्र इत्यल्पपरिमाणकथनाज्जीव एवेति पूर्वः पक्षः। अत्राभिधीयते ईशानो भूतभव्यस्येति स्वरवेणोक्तशब्दादेवात्राङ्गुष्ठमात्र पुरुषः परमात्मा न जीवस्तस्य भूतभव्यस्येशानत्वं न सम्भवति ॥२४॥

चिद्वस्तुप्रतिजीवस्यापीशानत्वसंभवाज्जीवपक्ष एव ज्यायानिति पूर्वंपक्षः । स्वभावतः सर्वं प्रतीशीतृत्वस्योपासनार्थं स्वल्पपरिमाणवत्त्वस्य परमात्मन्यपि संभवात् परमात्मपक्ष एव ज्यायान्। तथा 'अन्यत्र धर्मादन्यत्राधर्मादिना जीवं विहाय परमात्मन एवोपस्थानात् परमात्मैवोपास्य इति सिद्धान्तः। एतादृशमाशयमादाय प्राह "काठके" इत्यादि काठके यमनचिकेता संवादपरक श्रुतौ अङ्गुष्ठमात्र इत्यादि अङ्गुष्ठ मात्रःअङ्गुष्ठमात्रं प्रमाणां परिमाणं विद्यते यस्य स अङ्गुष्ठमात्र स्तावत्परिमाणवान्। पुरुषः पुरि शरीरे शयनात् पुरुषः। अथवा शरीराद्युपाधिक हस्तपादादिशरीरावयवैरुपलक्षितः । मध्ये आत्मनि आत्मनो हृदय प्रदेशस्य मध्ये वर्तमानः विद्यते। तथा भूतस्यातीतकालिकस्य भव्यस्यानागतकालिकस्य वर्तमानकालिकस्य आद्यन्तावस्थाभ्यां मध्याव स्थाया अपि संग्रहात्। एतादृशपदार्थमात्रस्य. ईशानो नियमनकर्त्ता आत्मा विद्यते। एतादृशात्मज्ञानवान् सर्वपदार्थजातं परमेश्वरैकदेशभूतं जानन् कस्मैच्चिदपि शुभाशुभाद्वा घृणां न करोति तदाहुराचार्याः

है और जीव में सर्व नियामकघटितत्व घटित नहीं होता है । तो क्या अङ्गुष्ठ श्रुति के अनुग्रह से जीवोपासनापरक इस वाक्य को माना जाय और तदनुरोधात् 'ईशान' श्रुति को गौणो मानें। अथवा ईशान श्रुत्यनुरोधात् परब्रह्मपरक इस वाक्य को मानें और अङ्गुष्ठ श्रुति को गौणो माने। अन्यतर को अन्यतरानुरोध का संशय होने से प्रथम का अनुरोध ही ठीक है। अतः अङ्गुष्ठ श्रुति के अनुरोध से ईशान श्रुति का समन्वय करना चाहिए इसलिए जीवोपासनापरक यह वाक्य है परमेश्वरोपासनापरक नहीं है। एतादृश विचार को प्रस्तुत करने के लिए आचार्य प्रक्रम करते हैं "काठके"

वात्सल्येनेतरेऽपि जना मलिनमपि स्वपुत्रादि स्वगेहादि वा नत्यजन्ति तत्र तेषां जुगुप्साया अभावात् (आनन्दभाष्यम् ।२।१।१२) एतादृश गुण विशिष्टं यद्वस्तुतदेवतत्, नचिकेतसा पृष्टं ब्रह्म एतदेवेति

अत्र संशयो भवति यत् उपर्युक्तगुणविशिष्टो यः स जीवः परमात्मा वा यतो जीवोपस्थापकस्य अङ्गुष्ठमात्र इति विशेषणस्य दर्शनात् तथा परमात्मोपस्थापकस्य ईशानेति विशेषणस्य दर्शनात्। तथा चोभयलिङ्गदर्शनात् जीवस्योपास्यतया ग्रहणं परमात्मनो निरङ्कुशशासनकर्तुः परमपुरूषस्यवोपास्यतयाग्रहणमिति । एवमाह वृत्तिकारः अत्र किमङ्गुष्ठमात्रः पुरुषो जीव उत परमात्मेति संशय इति ।

एतादृश संशये किमत्र युक्तम् ? जीव परिग्रहहणमेव यतः स्वभावतो जीवस्यैव तादृश परिमाणवत्वात्। ततः सत्यवतः कायात् पाशवद्धवशंगतम्। अङ्गुष्ठामात्र पुरुषं निश्चकर्षयमोवलात् इत्यादौ श्रूयमाणं यमस्य बलपूर्वकमाकर्षणं जीवपक्षमेवानुमोदते । नहि सर्वनियामकस्य सर्वशरीरिणः परमात्मनो यमेन तदन्येन वा आकर्षणं संभवति तथा 'अस्थूलमनणु' इत्यादिसर्वमानपरिमाणरहितस्य विभोरङ्गुष्ठमात्र इत्यादि । यम नचिकेता के संवादपरक कठोपनिषद में एक मन्त्र आया, 'अङ्गुठमात्रः" इत्यादि हृदय के मध्य में अंगूठा प्रमाणक पुरुष है जो कि अतीतानागन सकल प्राणियों का नियन्त्रण करनेवाला है उसका ज्ञान होने से नीचोत्तम विषयक घृणा का अभाव हो जाता है वही ब्रह्म हैं । अब यहाँ सन्देह होता है कि अंगुष्ठ मात्र पुरुष जीव है अथवा परमात्मा इसमें पूर्वपक्ष होता है कि अंगुष्ठ पद से अत्यल्प परिमाण का कथन होने से अणु परिमाण जीव का ही ग्रहण होता है अतः यह जीवोपासनापरक वाक्य है । परमात्मा तो परिमाण रहित है इसलिए परमात्मापरक यह वाक्य नहीं है । यहाँ परमात्मा के उपासन का कथन ही है इस के सम्बन्ध में कहते हैं "अत्राभिधीयते" इत्यादि यह वाक्य परमात्मा का ही बोधक है ।

परिमाणवत्वमपि पोषयत्यसंभवताम् मध्ये आत्मनि तिष्ठतीति विशेषणकथनमपि न परमात्मनोऽनुकूलम् सर्वव्यापके परमात्मनि तदसंभवात्। तस्मादिहोपास्यतया जीवस्यैव ग्रहणं नतु कथमपि परमात्मनो ग्रहणं युक्तमिति। न च जीवपरिग्रहे "ईशान" इतिविशेषणमनुपयुक्तमिव स्यादिति वाच्यम् यत् किञ्चित्कार्यं प्रतिजीवस्यापि नियन्तृत्वसंभवात्। जीवपक्षे एकस्यैव विशेषणस्य प्रकारान्तरेण नयनं भवति परमेश्वरपक्षेत्वनेकानि विशेषणानि स्वार्थात्परिच्याव्यमानानि भवन्ति अतोऽनेकत्र लक्षणापेक्षयैकत्र लक्षणैवन्याय्येति पूर्वपक्षः। एतादृशं पूर्वपक्षं निरसितुमाह "अत्राभिधीयते" इत्यादि] अत्र प्रकरणे ईशानो भूतभव्यस्येति स्वकण्ठेन समुच्चारितशब्दबलादेव अङ्गुष्ठमात्र पुरुषो निरंकुशसर्वेशिता परमपुरुषभगवान् साकेताधिपतिरेव गृह्यते उपासनार्थम् नतु तनुमहिम्नो जीवस्योपास्यतया ग्रहणम्। तस्मिन् जीवकालत्रयवर्तिसकलवस्तुन ईशानत्वस्यासंभवात्। यद्यपि यत्र कुत्रचित् ईशित्वंजीवस्यापि दृश्यते तथापि निरंकुशमीशित्वं श्रूयमाणमञ्जसा तस्मिन् जीवे नास्ति परमेश्वरेतु तत् तथा विद्यते। अङ्गुष्ठमात्रपरिमाणवत्वमपि कयाचिद् व्यपेक्षया परमेश्वरे संभवत्येव। सर्वस्येशितृत्वंत्वञ्जसा परमेश्वर एव तिष्ठति। तस्मादंगुष्ठमात्रपुरुषपदेनोपास्यतया

क्योंकि "ईशानो भूतभव्यस्य" एतादृश विशेषण है। इसलिए यहाँ अंगुष्ठमात्र पुरुष परमात्मा ही है जीव नहीं। क्योंकि भूतभव्य अर्तात नागत वर्तमान सब प्राणियों का ईशान नियमन रूप कार्य जीव में संभवित नहीं हैं। जीव तो स्वयं परमेश्वर के अधीन है और परमात्मा सर्वतन्त्र स्वतन्त्र है इसलिए परमात्मा में "भूतभव्यस्य" यह विशेषण सर्वथा अनुकूल है। अतः 'उपासकानां कार्यार्थं ब्रह्मणो रूप कल्पना इत्यादि श्रुति को ध्यान में रखते हुये अंगुष्ठ श्रुति की उपासनापरक गौणी वृत्ति को स्वीकार करके श्रुत्यर्थ का समन्वय करना ही उचित है। तस्मात् "अङ्गुष्ठमात्रः पुरुषः"

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ।१।३।२५।

अपरिच्छिन्नस्यापि परमात्मनः सर्वगतत्वेनोपासकहृदयेऽवस्थितत्वादङ्गुष्ठमात्रत्वमपि युज्यते । यत उपासकानां मनुष्याणां हृदयं हि तत्तदुपासकाङ्गुष्ठप्रमितं वर्तत इति तत्रोपास्यतयावस्थितस्य परमा-

---

परमात्मन एव ग्रहणं भवति नतु जीवस्योपास्यतया ग्रहणम् । अङ्गुष्ठमात्र श्रवणं तूपास्यतया परमात्मनमेवावबोधयतीति संक्षेपः ॥२४॥

विवरणम्– अथ "अङ्गुष्ठमात्रः" श्रुतिः "सर्वेशानः" श्रुत्यनुरोधेन परमेश्वरपरत्वेन व्याख्याता परन्तु सर्वव्यापकस्यापरिच्छिन्नस्य परमेश्वरस्यतत्कथं स्यादित्याशङ्क्य सर्वव्यापकोऽपि परमेश्वर उपासकानामनुग्रहाय तदीयहृदये वर्तमानस्तादृशाल्पपरिमाणवानपि भवतीति अङ्गुष्ठमात्रप्रतिपादकश्रुतेः प्रामाण्यं निर्वहति । तथा च परमेश्वर एवात्रोपास्यतया परिगृहीतो भवतीति दर्शयितुं प्रक्रमते "अपरिच्छिन्नस्यापी" त्यादि सर्वप्रकारकपरिच्छेदरहितस्यापि परमात्मनः सर्वान्तर्यामिता रूपेणगगनवत् सर्वत्र विद्यमानस्यापि परमात्मनः परमपुरुषसाकेतनिवासिनः भक्तिप्रपत्तिभ्यां समन्वितोपासक इत्यादि श्रुति प्रतिपादित परमात्मा की उपासना है वही यहाँ अभिमत है नतु जीवोपासना अभिमत ॥२४॥

सारबोधिनी–परम पुरुष श्रीराम तो सर्वव्यापक हैं तब उनका अंगुष्ठमात्र पमिाणवत्व रूप से परिच्छिन्नत्व व्यवहार किस प्रकार हो सकता है तब आप किस प्रकार कहते हैं कि इस प्रकरण में परमात्मा ही उपास्य रूप से परिगृहीत होते हैं । जीव तो स्वभावतः अल्प परिमाणवाला है तो उसमें अङ्गुष्ठमात्र कथन संभवित हो सकता है एतादृश आशंका का निराकरण करने के लिए करते हैं "अपरिच्छिन्नस्यापि परमात्मनः" इत्यादि । यद्यपि श्रीराम परमव्यापक हैं तथापि कारणवश उनमें परिच्छिन्नत्व संभवित हो सकता है इस बात को बतलाते हैं । अपरिच्छिन्न भी परमात्मा श्री

त्मनोऽपि तथङ्गुष्ठमात्रत्वमुपासकहृदयापेक्षम् । विधिनिषेधशास्त्राणां मनुष्यमधिकृत्य प्रवृत्तत्वात्तस्यैव चोपासकत्वसम्भवात्तत्तदङ्गुष्ठप्रमितत्वमेवात्र ग्राह्यमिति तत्त्वम् ॥२५॥

इति श्रीरघुवरीयवृत्तौ प्रमिताधिकरणम् ॥६॥

शरीरस्थ हृदयप्रदेशेऽवस्थानेन तदीयपरिमाणो न तद्वदेव भवति। यथा घटाद्यवच्छिन्नं नभः । हृदयश्चाल्पपरिमाणसत्त्वेन. तादृशपरिमाणवान् भवत्. अङ्गुष्ठमात्रमानवान् भवति परमात्मा । हृदयपरिमाणन्तूपासकस्याङ्गुष्ठपरिमितमेव, उपासकता च मनुष्यस्यैव तेषांमेवोपासनायामधिकार इति । तस्मात् परमेश्वरस्यापि यथा कथञ्चित् अङ्गुष्ठमात्रप्रमाणकत्वं नोपरुद्धं भवति । विधिनिषेधादिशास्त्राणां "स्वर्गकामोयजेत" 'न कलञ्जं भक्षयेदि'त्यादिकानां मनुष्यमधिकृत्यैव प्रवृत्तिदर्शनात् । नहि मनुष्येतरमभिलक्ष्य शास्त्रं प्रवर्त्तते, तत्रापि द्विजातीनेवाधिकृत्यशास्त्रप्रवृत्तेः । ततश्च मनुष्यस्यैवोपासकत्वान्मनुष्यहृदयस्य तदीयाङ्गुष्ठपरिमितत्वात्तादृशपरिमाणपरिमितत्वं परमेश्वरस्य संभवतीति व्यापकोऽपि परमात्मा "अङ्गुष्ठ" श्रुत्योपासनार्थंपरिगृह्यते । यद्यपि जीवपरिग्रहे सर्वेशानश्रुति गौणीक्रियते पर-

सीताधिपति है। तो भी अन्तर्यामी होने से सर्वगत हैं । अतः उपासक जो भक्त लोग हैं उनके हृदय में भी अवस्थित होने से भगवान् में अंगुष्ठ परिमाणवत्व हो सकता है । क्योंकि उपासक जो मनुष्य वर्ग हैं उन मनुष्योंका हृदय अन्तःकरण उन उपासकों के अंगूठा के बराबर होता है। अतः तादृशोपासक के हृदय में उपास्यता रूप से विद्यमान जो परमपुरुष हैं वे भी भक्तों के अंगुष्ठमात्र रूप ही हैं । श्रुति भी कहती है "समः प्लुषिणा समोमशकेन सम एभिस्त्रिलोकैः" इत्यादि । अदिक्षुद्र जन्तु के समान हैं, मशक के समान है, इन तोनों लोक के समान हैं । अर्थात् यादृश स्थल में अवस्थित रहते हैं तादृश परिमाणवान् ही भगवान्भासित होते हैं ।

देवताधिकरणम् ॥७॥

तदुपर्य्यपि बादरायणः सम्भवात् ।१।३।२६।

अथात्र प्रकृतविषये प्रासङ्गिकं किञ्चिच्चिन्त्यते । पूर्वत्र मनुष्यमधिकृत्यैव ब्रह्मोपासनशास्त्रप्रवृत्तिरित्यभिहितम् । तत्प्रसङ्गाद्देवादीनां ब्रह्मविद्यायामधिकारोऽस्ति नवेति संशयः समुदेति । तत्रोपासनोपयोगिकरणकलेवरविधुराणां देवादीनां सामर्थ्यार्थित्वयोरभावान्न ब्रह्मविद्याया-

---

मात्मपरिग्रहे च अङ्गुष्ठमात्रश्रुतिर्गौणीक्रियत इति गौणवृत्तेराश्रयणमुभयत्रापि समानमिति नियामकाभावात्कस्यात्रोपास्यतेति निश्चयो न भवति । तथापि परमेश्वरोपासनायाः साकेतादिमोक्षफलप्रापाकत्वेन जीवोपासनायाः क्वचिदप्यदर्शनात् परमेश्वरपक्ष एव ज्यायान् सति कल्पनासमत्वेपीति सम्प्रदाय विदः । अमुमेवाशयम् "इति तत्वम्" इति पदप्रयुञ्जानो वृत्तिकारः प्रदर्शितवानिति संक्षेपः ॥२५॥

इति जगद्गुरुश्रीरामानन्दाचार्यरामप्रपन्नाचार्ययोगीन्द्रकृतौ श्रीरघुवरीयवृत्तिविवरणे प्रमिताधिकरणम् ॥६॥

विवरणम् —अथ मनुष्यानधिकृत्य शास्त्रं प्रवर्तते इति कथितं ततश्च मनुष्या ब्रह्मोपासनायां प्रवर्तन्ते मनुष्याणां हृदयं च स्वकीयाङ्गुष्ठ परिमितं ततस्तदवस्थितस्य परमेश्वरस्यापि तत्संभवतीत्यादिना पूर्वं "स्वर्गकामो यजेत" [स्वर्ग कामनावान् पुरुष पौर्णमास याग करें ।] "नकलञ्जंभक्षयेत्" इत्यादि विधिनिषेध शास्त्र मनुष्य को अधिकृत करके ही प्रवृत्त होता है और वह मनुष्य ही उपासक होता है । इसलिए मनुष्य का जो अंगूठा है । उसके परिमाण से ही परिमितत्व को यहाँ ग्रहण करना चाहिए । इस प्रकार इस प्रकरण का तत्त्व है ॥२५॥

इति सारबोधिनीमें प्रमिताधिकरणम् ॥६॥

सारबोधिनी— अब यहाँ प्रकृत ब्रह्मोपासन विषय में प्रसंग संगति प्राप्त वस्त्वन्तर का भी कुछ विचार किया जाता है । पूर्व प्रकरण में

मधिकार इति पूर्वः पक्षः । अत्राभिधीयते–'वज्रहस्तः पुरन्दरः' "तेनेन्द्रो वज्रमुदयच्छत्, "तौ हासंविदानावेव समीत्पाणी प्रजापति सकाशमाजग्मतुः" [छा०८।७.२।] इत्यादि वैदिकप्रमाणैर्विग्रहादिमत्तया सामर्थ्यस्य सुतरां सम्भवात् । स्वर्गस्यापि सातिशयफलाधा-

---

वर्णितमिति स्वभावत एवात्र जिज्ञासा जायते यद् ब्रह्मोपासने मनुष्यस्यैवाधिकारोऽन्येषामपिवेति प्रकृतविषये एकाधिकारचिन्तनमपि सम्प्राप्तमिति तदेव दर्शयितुमाचार्यः प्रक्रमते "अथात्रेत्यादि अथात्र प्रकृत ब्रह्मोपासनाप्रकरणे प्रासंगिकं प्रसङ्गसङ्गत्या प्राप्तं वस्तु । प्रसंगस्तु स्मृतस्योपेक्षानर्हत्वलक्षण एव । ततश्च तद्वस्तुविषये किञ्चिद्विचार्यमाणं भवतीति । किमत्र वस्त्वन्तरं विचारणीयं संप्राप्तं तत्राह "पूर्वत्र इत्यादि । पूर्वत्र इतः पूर्व प्रकरणस्य चरमभागे मनुष्यमधिकृत्यैव नतु तदितरमधिकृत्य ब्रह्मोपासनाप्रतिपादकशास्त्रस्य प्रवृत्तिरस्तीति । विशेषतो मनुष्यस्यैवाधिकार कथनात् तदतिरिक्तदेवानां ब्रह्मविद्यायामधिकारोऽस्ति नवेत्याकारकः संशयो जायते संभवति तेषामपि कदाचिन्मोक्षविषयिणीच्छेति ।

मनुष्य को अधिकृत करके ही ब्रह्म की जो उपासना तत्प्रतिपादक शास्त्रों की प्रवृत्ति है ऐसा कहा है । उस प्रसंग में देवताओं को ब्रह्म विद्या में अधिकार है अथवा तादृश अधिकार नहीं है ऐसा संशय होता है । इसमें पूर्वपक्षवादी कहते हैं कि उपासना शारीरक तथा मानस व्यापार रूप है तो उपासना का कारण जो शरीरादिक है वह तो देवों का नहीं है ।तब प्रयोजक शरीर के अभाव में प्रयोज्य जो उपासना वह किस तरह से हो सकेगी । तथा शरीरादि के अभाव होने से अर्थित्व सामर्थ्य रूप जो अधिकार का कारण है वह भी देवताओं को नहीं है इसलिये देवों को ब्रह्म विद्या में अधिकार नहीं है । एतादृश पूर्वपक्ष के उत्तर में मनुष्य से ऊपर के रहनेवाले देवों को ब्रह्म विद्या में अधिकार है ऐसा श्रीरामानन्द

यितया सुखदुःखयोस्तेषामनुभवात्सम्प्राप्त दुःखापनुत्तये निरतिशय सुखोपलब्धयेऽर्थित्वस्यापि सम्भवात्प्राग् जन्मन्यभ्यस्तविद्यायाश्चाविस्मरणाद्देवादीनामपि तद्ब्रह्मोपासनं सम्भवतीति बादरायण आचार्यो मन्यते ॥२६॥

ततश्च संशयानन्तरं भवति पूर्वः पक्षः उपासनायां कारणं करणकलेवरादिकम् न च करणकलेवरादिकं देवानामस्तीति प्रसिद्धं तदभावे चाधिकारे साक्षात्कारणं यत् अर्थित्वं सामर्थ्यञ्च तदपि देवादेर्नास्ति शरीराभावात्। तस्मात्कलेवररहितस्य देवादेर्नास्ति ब्रह्मविद्यायामाधिकारः किन्तु मनुष्यणामेव तत्रापि संस्कारवतामेवेति ॥

एतादृशपूर्वपक्षनिरासाय प्राह "अत्राभिधीयते" इत्यादि। अत्र प्रकृताधिकारविषये समाधानं करोमीत्यर्थः। देवादीनां शरीराभावान्न ब्रह्मोपासनेऽधिकारः कथितः। तत्रानधिकारमेवान्यथयति "वज्रहस्त" इत्यादि प्रमाणैः। पुरन्दरो वलाभिमानी देवो वज्रहस्तः सोयमिन्द्रो वृत्राय वज्रमुदयच्छत् वृत्रोपरिवज्रप्रहारं कृतवान। तौ इन्द्रविरोचनौ प्रजापतेः सकाशं गतौ ब्रह्मपरिज्ञानाय समिद्धारहस्तौ उषतुश्च वहुवर्षाणि ब्रह्मचर्यधारणपूर्वकौ इत्यादिप्रकरणे यत् प्रतिपादितं तेन ज्ञायते देवादीनामपि शरीरं भवत्येव। अन्यथा तदभावे शरीरसाध्यकर्मणामभावात् कथमिव प्रकरणं सगतं स्यात्। तस्माद्विद्यते एव देवादीनां शरीरादिकम् तत

सम्प्रदाय के सातवें आचार्य ब्रह्म सूत्रकार भगवान् बादरायणजी ने कहा है। उसी विषय को स्पष्ट करने के लिए वृत्तिकार कहते हैं "वज्रहस्तः पुरन्दरः" इत्यादि। [वज्रहस्त पुरन्दर है" इन्द्र ने वृत्रासुर को वज्र मारा" वे इन्द्र तथा विरोचन समित् पाणी होकरके प्रजापति के पास में आये"।] इत्यादि वैदिक प्रमाणों से सिद्ध होता है कि देवताओं का भी शरीर होता है। और जब विग्रहवत्ता है तब सामर्थ्य भी अर्थतः सिद्ध हो जाता है। स्वर्ग को भी सातिशय फलवान् होने से

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ।१।३।२७।

नन्तु देवादीनां करणकलेवरादिसत्त्वे युगपदनुष्ठीयमानेष्वनेककर्मसु सान्निध्यासम्भवात्कर्माङ्गभावे विरोधः प्रसज्येतेति चेन्न, सम्प्राप्त-यौगिकसामर्थ्यानां सौभरिप्रभृतीनां युगपदनेकशरीरप्रतिपत्तेर्दर्शनान्न कश्चिद्विरोधः ॥२७॥

श्च शरीरादीनामभावो हेतु स्वरूपासिद्धः । शरीरसद्भावे सामर्थ्यस्यापि संभवः सुतरामेव संभवति । ततश्चाधिकारकारणयोः शरीरसामार्थ्ययोः सद्भावाद्देवादीनामपि ब्रह्म विद्यायामधिकारोऽस्त्येव नतु शूद्रादिवदन-धिकारित्वमिति सिद्धम् । किञ्च स्वर्गोंपि ननित्यः किन्तु सातिशय सुखादिजनक एव ततश्च कर्मवैगुण्यादिसंपादितदुरदृष्टजनितदुःख प्रक्षयाय नित्यसुखप्राप्तये चार्थित्वमपि तेषां संभवति । देवा अपि स्व र्गस्यानित्य फलतां ज्ञात्वा ततोविरक्ता नित्यसुखोपलब्धये ब्रह्मोपास-नाया लग्नमनसो भवन्तीति । ततश्च मनुष्यादुपरिवर्तमानानां देवानामपि अधिकारोऽस्त्येवेति बादरायण आचार्योऽनुमन्यते । यतोऽधिकारकार-णयोरर्थित्वसामर्थ्ययो र्देवेष्वपि सम्भवादिति सक्षेपः ॥२६॥

विवरणम्—अथ शास्त्रं मनुष्यानेवाधिकृत्य प्रवर्तते. ततश्च देवादीनां ब्रह्मविद्यायामधिकारोऽस्ति नवेति संशये मनुष्यादुपरिवर्तमानानामपि सुख तथा दुःख का अनुभव भी हेता है । तब समय समय प्राप्त जो दुरित कर्म प्रयुक्त दुःख तादृश दुःख के विनाश करने के लिए तथा नित्य सुख प्राप्ति के लिए देवों में अर्थित्व भी हो सकता है तथा पूर्व जन्मा-भ्यस्त विद्या का अविस्मरण होने से देवताओं को भी दुःख विगम नित्य सुख प्राप्ति के लिए ब्रह्मोपासन संभवित है । ऐसा बादरायण आचार्य मानते हैं ॥२६॥

सारबोधिनी— शास्त्रीय कर्म में मनुष्य को अधिकार है । क्योंकि शास्त्र मनुष्य को अधिकृत करके ही प्रवृत्त होता है । तब शरीर रहित

देवानां विग्रहवत्वेनार्थित्वसामर्थ्ययोरधिकारकारणस्य विद्यमानत्वान्मनुष्यवद्देवा अपि ब्रह्मविद्यायामधिकृता भवन्तीति पूर्वसूत्रे कथितम् ततश्च विग्रहवतामिन्द्रादिदेवानामेककालेऽनेकत्रयागेऽवस्थानस्यासंभवाद्विरोधो भवति । नहि विग्रहवान् एकस्मिन्कालेऽनेकत्रस्थलेऽवस्थितो भवन्दृश्यते इति चेत्. यथायोगप्रभावात्सौभरिप्रभृतीनामनेकशरीरधारणं भवति तथैव सम्प्राप्तयोगमाहात्म्यानां देवानामप्येकस्मिन्नेव समयेऽनेकत्रावस्थानसंभवान्नास्ति कर्मणि कश्चिदपि विरोधः । इत्याशयं प्रकटयितुमाह "ननु देवादीनाम्" इत्यादि । देवानां पुरन्दरवरुणादीनांयागाङ्गत्वेन शास्त्रप्रतिपादितानाम्. करण कलेवरादिसत्त्वं शरीरेन्द्रियवताम्. युगपत् एक कालमनुष्ठीयमानेषु

देवों को ब्रह्म विद्या में अधिकार है अथवा नहीं है इस संशय में शरीराभाव के कारण देवों को अधिकार नहीं है यह पूर्वपक्ष करके बादरायण आचार्य ने कहा शास्त्र में प्रमाण है । देवता का भी विग्रह होता है और विग्रहवान् होने से अर्थित्व सामर्थ्य रूप से अधिकार कारण होने से देवताओं को ब्रह्म विद्या में अधिकार है । ऐसा व्यवस्थित किया गया । परन्तु जब देवता को विग्रहवान् मानते हैं तब विग्रहवान् इन्द्रादिक देव एक काल में अनेक यज्ञों में अङ्ग रूप से अवस्थित हो सकेंगे ? एतादृश विरोध कर्म में होता है । तब उत्तर करते हैं । जैसे योग प्रभाव से सौभरि प्रभृति को अनेक शरीर धारण शक्ति थी उसी प्रकार से प्रकृत में भी कोई विरोध नहीं है । इस आशय को लेकरके आचार्यजी कहते हैं "ननु देवादीनाम्" इत्यादि । यदि इन्द्र वरुण देवों को कलेवर करण– शरीरेन्द्रिय का सद्भाव माना जाय तब तो एक काल में अनुष्ठीयमाम अनेक याग में अवस्थान असंभवित है । क्योंकि एक विग्रहवान् पुरुष एक ही काल में अनेक स्थल में संपद्य

संपाद्यमानानेकयजमानककर्मसु सोमदर्शादियागेष्ववस्थानं सान्निध्यं कथंस्यात् । नहि एककालेऽनेकै भोजनंकुर्वाणोऽनेकत्र ब्राह्मणो भवति । तत्कथम् ? विग्रहवतामनेकत्रैककालेऽवस्थानस्यासंभवात्तद्वदेव. एको विग्रहवान्देवोऽनेकत्र कर्मणि समवस्थितः स्यादिति तेषां देवानामङ्गभावे विरोधः प्राप्नोतीति चेन्न. अनेकप्रतिपत्तेर्दर्शनात् । अयमाशयः संप्राप्तयौगिकसामर्थ्यानां परिपक्वयोगानां सौभरिप्रभृतिक ब्राह्मणानां यथैकदैवानेककरणकलेवरप्राप्तिस्तथा आजानदेवानामिन्द्रादीनामप्यनेकशरीरवत्वेन एककालमेवानेकत्रानेकशरीरेणावस्थानसंभवान्नात्रकर्मणि कोपि विरोधः । अथवा विग्रहवानपि विशिष्ट

मान कर्म में अङ्गभाव को प्राप्त नहीं कर सकता । यथा एक पण्डित एक ही काल में विद्यालयद्वय में अध्यापन नहीं करता है । इसी तरह विग्रहवान् पुरन्दरादिक देव एक काल में अनेक याग में उपस्थित किस तरह से हो सकते हैं । तो इस प्रकार से देवता को विग्रहवान् मानने पर कर्माङ्ग का विरोध होता है इसके उत्तर में कहते हैं "अनेक प्रतिपत्तेदर्शनात्" अर्थात् एक अनेकता को प्राप्त करता है, ऐसा देखने में आता है । इसी का स्पष्टीकरण करते हैं "सम्प्राप्त यौगिक" इत्यादि । योगानुष्ठान द्वारा सम्प्राप्त है यौगिक सामर्थ्य जिनको एतादृश जो सौभरि प्रभृति ऋषि गण उन लोगों को एक काल [युगपत्] अनेक शरीर की प्राप्ति हुई है, ऐसा शास्त्र में सुनने में आता है । [योग प्रभाव से ऋषि लोग अनेक शरीर को बना करके किसी सरीर द्वारा पृथ्वी में संचरण करते हैं, तथा तत्तदभिलषित विषयादि को एकसाथ प्राप्त करते हैं और भोगते हैं ऐसा पुराणों में प्रसिद्ध है ।] तो जिस प्रकार योगी को ऐच्छिक अनेक शरीर धारण क्षमता होती है उसी प्रकार देवता लोग भी अनेक शरीर द्वारा कर्माङ्ग भाव को प्राप्त कर सकते हैं, तो देवता को विग्रहवान् होने पर भी कर्माङ्गभाव में कोई विरोध नहीं है ।

शब्द इति चेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्याम् ।१।३।२८।

नन्वेवमपि वैदिके शब्दे विरोधस्त्वस्त्येव। देवादीनां विग्रहविशिष्टानां सावयववत्वेन जनिमृतिसत्त्वात् । उत्पत्तेः प्रागर्वाक् च मृतेरर्थवैधुर्येऽनित्यत्वं भवेदितिचेन्न, अतो विनष्टार्थकाद्वैदिकाद्देवादिशब्दात्पुनर्देवाद्यर्थस्य प्रभवात् । इन्द्रादिशब्दानां संस्थानरूपाकृत्यभिधायित्वं न

माहात्म्योधीतवेदादिगुणवान् ब्राह्मणोऽनेकैरेकसमये नमस्क्रियमाणो भवति. न तत्र शरीरवत्वंबाधकम्. तथैव यागोद्देश्यताऽनेकस्थले. एकस्यापि देवस्य संभवान्नास्ति कश्चिद्विरोधः कर्मणि देवानां विग्रहवत्वेऽपीतिदिक् ॥२७॥

विवरणम्—ननु देवादीनां विग्रहवत्वेपि विशिष्टशक्तियोगात् सौभर्यादिवदनेकशरीरबलेनानेकत्रयागे. समानकालेऽपि शङ्काव संभवात् कर्मणि विरोधो यथाकथंचित् परिहृतः परन्तु वैदिकवस्वादि शब्देतु सदुरात्मा विरोधः समापतत्येवेति "भक्षितेऽपिलशुनेनशान्तोव्याधिरि"तिन्याय विषयताया अतिक्रमणं नभवतीति वैदिकशब्देऽपि विरोधपरिहारायोपक्र-

अथवा जिस तरह ब्राह्मण एक समय में अनेक स्थल में भोजन तो नहीं कर सकता है। किन्तु एकत्र अवस्थित वही ब्राह्मण अनेक छात्र भक्तों से नमस्क्रीयमाण होता है। इसी तरह एक भी देव अनेक याग में एक काल में त्यागोद्देश्यतारूप अनेक देवत्व की प्राप्ति कर सकते हैं। अतः विग्रहवान् होने पर भी कर्माङ्ग भाव में कोई विरोध नहीं होता है। इसलिये विग्रहवान् देव ब्रह्मविद्या में अधिकारी हैं ॥२७॥

सारबोधिनी—देवता को विग्रहवान् मानने पर भी अनेक शरीर योग ऐश्वर्य से हो जाता है ऐसा मानकर कर्म यागादिक में किसी प्रकार का विरोध नहीं होता है। ऐसा पूर्वसूत्र में कहा गया। परन्तु देवादिबाचक जो शब्द हैं उसमें तो विरोध है। क्योंकि देवादिक रूप जो अर्थ उसको अनित्य होने से नित्य शब्द के साथ संबन्ध किस तरह से होगा

पुनर्व्यक्तिबाधकत्वम् । तथा च प्रजापतिर्भगवानिन्द्रादिरूपव्यक्तेस्सर्गादावभावेऽपि तच्छब्दाभिहिताकृतिं मनसिकृत्य भूयोऽप्यन्यामिन्द्रादिरूपां व्यक्तिमुत्पादयति । एतच्च "सभूरिति व्याहरत्सभूमिमसृजत्" [तै० ब्रा० २।२।४।२२।] "वेदेन नामरूपे व्याकरोत्सतासती प्रजापतिः" । 'सर्वेषान्तु स नामानि कर्माणि च पृथक् पृथक् ।

मन्नाह "नन्वेवमपि वैदिके शब्दे" इत्यादि । अत्र 'ननु' इति शब्देन पूर्वपक्षं दर्शयति । यद्यपि देवादीनां विग्रहवत्त्वेऽपि विशिष्टशक्तियोगात् अनेकप्रपिपत्तिसंभवेन कर्मणि विरोधपरिहारो भवतुनाम. तथापि वस्वादि वाचकवैदिकशब्देतु विरोधोऽस्त्येवेति. अंशतो विरोधसमानेपि विरोधोऽस्त्येवेति । यतो विग्रहवतां देवानामुत्पादविनाशयोरावश्यकतयानित्यत्वस्यानिराकरणीयत्वात् । देवरूपोऽर्थोऽनित्य उत्पादविनाशत्वात् घटादिवत् । देवरूपोऽर्थ उत्पादविनाशवान् सावयवत्वात् पूर्ववदेव । ततश्चोत्पादविनाशवत्वेनानित्यत्वमेव । उत्पत्तेः प्राक्काले तत्प्रागभावसमये विनाशादनन्तरं चार्थस्याविद्यमानत्वेन वस्तुनोऽसत्वरूपमनित्यत्वमवस्यमेवस्यादिति पूर्वः पक्षः—एतादृशशङ्कायामुत्तरं प्रतिपादयति. "अतः प्रभवा" दिति । तदर्थमेव परिष्फोरयति "अतो विनष्टार्थका" दित्या-

यदि दोनों सम्बन्धी नित्य होंगे तब हो सबन्ध भी नित्य हो सकता है। यहाँ पुरन्दरादिक जो अर्थ है वह तो उत्पाद विनाशशाली होने से अनित्य है तो अनित्य के साथ नित्य वैदिक शब्द का नित्य सबन्ध असंभवित हैं। अतः वैदिक शब्द में तो विरोध होता है। देवादिक को विग्रहवान माना जाय, क्योंकि विग्रह का उत्पाद विनाश प्रत्यक्ष सिद्ध है । इस आशका का निराकरण करने के लिए पूर्वोत्तर पक्षोपन्यास पूर्वक सूत्र का व्याख्यानार्थ उपक्रम करते है "नन्वेवमपि वैदिक शद्बे विरोधः" इत्यादि । एवमपि विशिष्ट ऐश्वर्य योग से अनेक शरीर प्रतिपत्ति को देखने से यद्यपि कर्म यागादिक में विरोध का परिहार होने पर भी नित्य जो वसु पुरन्दरादि वैदिक शब्द हैं

वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे" [मनु० १।२१।] "नामरूपं च भूतानां कृत्यानाञ्च प्रवर्तनम् । वेदशब्देभ्य एवादौ देवादीनाञ्चकार सः" [वि० पु० १।५।६३।] इत्यादि श्रुतिस्मृतिभ्यामवगम्यते । एवञ्च शब्दपूर्वायाः सृष्टेः सत्वान्नशब्देऽपि विरोधः ॥२८॥

दि । अतोऽस्माद्विनष्टार्थको योहि वैदिकः पुरन्दरादिशब्दः तादृश वैदिक शब्दादेव पुनः सर्गादिकालेविग्रहादिविशिष्टपुरन्दराद्यर्थस्य तादृशशब्दस्य शक्यस्य पदार्थस्य प्रभवात्. समुत्पत्तेराविर्भावाद्वा । इन्द्रादिशब्दानाम्. य इमे पुरन्दरादिकाः शब्दास्ते न व्यक्तिं बोधयन्ति किन्तु संस्थानमेव । व्यक्तिबोधने आनन्त्यदोषप्रसङ्गात् । किन्तु तस्य नित्यत्वादेकत्वमेव बोधयन्तो वाचका भवन्ति ।

तथा च सर्गादिकाले प्रजापतिर्भगवान् यद्यपि पुरन्दरादिव्यक्तेर्नामरूपाभ्यां व्याक्रियमाणस्यासत्वेऽपि पुरन्दरादिशब्दप्रतिपाद्यां कारणेऽवस्थितां मनसालोच्य पुनरपि पुरन्दरादिव्यक्तिं

उसमें तो विग्रहवती देवता को मानने पर विरोध है ही। विरोध प्रकार को बतलाने के लिए ही कहते हैं "देवादिनामित्यादि" विग्रह विशिष्ट देवों को सावयव होने से उत्पाद विनाशशालित्व रूप अनित्यत्व तो अनिवार्य है [न्यायमत से प्रतिक्षण में अवयवों को उपचय अपचय होने से अनित्यता है] तब उत्पत्ति के पूर्वकाल तथा विनाशोत्तर काल में अवयवी का अभाव होने से अनित्यत्व अशक्य परिहार्य हैं। एतादृश पूर्वपक्ष के उत्तर में सूत्रावयव का व्याख्या करते हुए वृत्तिकार कहते हैं "अतोविनष्टार्थकेत्यादि यह जो विनष्टार्थक वैदिक शब्द इन्द्रकुवेरादिक वैदिकदेवता वाचक शब्द हैं उन शब्दों से पुनः वाच्य देवादिक जो पुरन्दरादिक अर्थ विषय है उसकी उत्पति होती है। इन्द्रादिक जो वैदिक शब्द हैं वे संस्थानरूपाकृति जाति का वाचक हैं। नतु अर्थ रूप व्यक्ति का वाचक क्योंकि यदि व्यक्ति वाचकता शब्द को

समुत्पादयति. नामरूपाभ्यामाविर्भावयति । एतदेव वक्ष्यमाणश्रुत्यादिभ्योऽवगम्यते । तथाहि "सभूरि"त्यादि स प्रजापतिः सर्गादिकाले पदार्थानाविर्भावयितुं व्यवस्थितः भूरित्याकारकं शब्दं व्याहरोदुच्चारयामास तदुच्चारणानन्तरमेव भूमिं सर्वप्राण्यधिष्ठानलक्षणमसृजत् समुत्पादयामास । शब्दादनन्तरं जायमानत्वात् भूमेःशब्दप्रभवत्वम् । यद्यप्यर्थस्यसमवायिकारणं न्यायमतेन परमाणुरेव. मतान्तरेऽव्यक्तं मायावेति नार्थोपादानत्वं शब्दस्य तथापि घटादिककार्येदण्डादिवन्निमित्तत्वन्तु शब्दस्याबाधितमेव "यदव्यवहितक्षणोत्तरं यज्जायते तस्य तन्मूलकत्वमिति" दण्डकपालाद्यनन्तरजायमानघटादिवदिति । "वेदेन नाम रूपे" इत्यादि प्रजापति ब्रह्मा सर्गादौ सतासतीसत्वा-

कहे तब तो व्यक्ति के अनन्त होने से आनन्त्य तथा व्यभिचार होता है और जातिवाचक होते हैं तो जाति तो एक है । इसलिए आनन्त्यादिक दोष नहीं है । अतः पद शक्यत्व जातो में है । लाघव होने से व्यक्ति का मान तो तुल्यवित्ति वेद्यत्व रूप से लक्षणा से बोध होता है । शक्यतावच्छेदकतया जाती का भान मानें तदपेक्षया शक्यतया जातिभान पक्ष ही श्रेयस्कर है । नैयायिक तो जाति विशिष्ट व्यक्ति में ही शक्ति मानते है । वह कहते है कि केवल गोत्वादि जाति में पद की शक्ति मानेगे तो गोपद का शक्यतावच्छेदक गोत्वत्व होगा और गोत्वत्व गवेराबृत्तित्त्वे सति सकल गो समवेतत्व रूप है । तो शक्यतावच्छेदक कोटी में व्यक्ति का प्रवेश होने से गौरव हो जाता है इत्यादि विचार को अन्यत्र देखना चाहिए । प्रकृत में मीमांसक मत के अनुकूल वृत्तिकार ने बतलाया कि शब्द जाति वाचक है, व्यक्ति का नहीं

जब शब्द का व्यक्ति वाचकत्व नहीं किन्तु संस्थान रूप आकृति वाचकता है तब प्रजापति भगवान् इन्द्रवरुणादि रूप जो व्यक्ति, तादृश व्यक्ति का सर्गके प्राक्काल में अभाव होने पर भी इन्द्रादि पदवाच्य जो आकृति

सत्वधर्मयुक्तनामरूपे व्याकरोत्. विस्पष्टे अकरोत् कृतवान् । केन कारणेन कृतवान् तत्राह "वेदेन" अर्थात् वेदशब्दंबोधकमुच्चारयन् नामरूपयोरुत्पत्तिं कृतवानित्यर्थः। "सर्वेषां तु" इत्यादि । स प्रजापतिः सर्वेषां सृज्यमानवस्तूनां नामानि पुरन्दरादीनि कर्माणि स्वरूपं च. पृथक्-पृथक् पार्थक्येन. नतु संमिलितरूपेण. आदौ सृष्टेः प्रवर्तन समये वेदशब्दद्वारा अर्थात् वैदिकशब्दात्मकनिमित्तमासाद्य पृथगवयवाकृतिविशिष्टतया निर्ममे निर्मापयाञ्चकारेत्यर्थः । "नामरूपं च भूतानामित्यादि । भूतानामित्यत्र भूतपदमशेषस्य जगत उपलक्षकं नतु भूतमात्रम् । सः प्रजापतिरादौसर्गसमये. सर्वस्यापि सृज्यमानपदार्थस्य नाम देवदत्तेत्यादिनाम, तथा तदीयं स्वरूपम्, तथा कृत्यानां कर्त्तव्यवस्तूनां प्रवर्तनं वैविध्येन प्रदर्शनम्, एतत्सर्वं देवादिशब्दप्रतिपाद्यानां वेदशब्देभ्य एव चकार कृतवान्. वेदशब्दं

तादृश आकृति को मन में संकलित करके तादृश जाति के आश्रय इन्द्र पुरन्दरादि व्यक्त्यन्तर को उत्पन्न करते है नतु पूर्व सर्ग स्थित व्यक्ति का उत्पादन करते हैं । "सोयमिन्द्रः" यह जो प्रत्यभिज्ञा होती है वह आकृति विषयकहै । व्यक्ति विषयक नहीं है "सैवेयं दीपकलिका" इसके समान "यथा वा त एवामी केशाः सैवेयं गुर्जरीतिवत्" यह विषय कपोल कल्पित नहीं है किन्तु प्रत्यक्ष तथा अनुमानगम्य है यहाँ प्रत्यक्ष शब्द श्रुति बोधक तथा सूत्र घटक अनुमान शब्द स्मृति बोधक है । यहाँ "श्रुतिस्मृतिभ्याम्" ऐसा सूत्रकार ने नहीं कहा । किन्तु "प्रत्यक्षानुमानाभ्याम्" ऐसा कहा । इसका तात्पर्ययह है कि लोक में जिस तरह प्रत्यक्ष प्रमाण स्वप्रामाण्य में इतरानपेक्ष है और अनुमान प्रत्यक्ष सापेक्ष है । इसी तरह प्रकृत में प्रत्यक्षवत् श्रुति के प्रमाण्य में इतरानपेक्षत्व तथा स्मृति में वेद प्रमाण्यापेक्ष प्रामाण्य को बतलाने के लिए ऐसा कहा है ॥

कौन श्रुति स्मृति इसमें प्रमाण है इसबात को बतलानें के लिए कहते

निमित्तीकृत्य सर्वसृज्यमानवस्तूनामुत्पादनं कृतवानिति विष्णुपुराण-वाक्यसारार्थः ॥

एवं च प्रदर्शितश्रुतिस्मृतिशतेभ्यः शब्दपूर्विकायाः सृष्टेर्दर्शनात् वैदिकशब्दे देवादीनां विग्रहवत्वेऽपि कश्चिद्विरोधोनोपलक्षिता भवति । एवम् "अनादि निधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः" । इत्यादि स्मृत्या वेदोऽपौरुषेयः संप्रदायाविच्छेदे सति स्मर्यमाण कर्तृकत्वादित्याद्यनुमाने च वैदिकशब्दानां नित्यत्वावगमात् । न च "छन्दांसि जज्ञिरे" इत्यादि श्रुत्या "प्रतिमन्वन्तरं चैषा श्रुतिरन्याविधीयते" इत्यादि स्मृत्या च वेदशब्दस्यानित्यमेवायातीति वाच्यम्. एतेषां प्रमाणानां संप्रदायप्रवर्तकत्वमात्रे तात्पर्यात् । तदाहुराचार्याः—"अतो वैदिक-हैं "एवंच सभूमिरितीत्यादि । उस प्रजापति ने सृष्टि के प्रारंभमें पहले भू एतादृश शब्द का उच्चारण किया । तब पृथिवी को भूर्लोक को बनाया उस प्रजापति ने वेद शब्द द्वारा नामरूप को बनाया । उस प्रजापतिने सृष्टि के आरंभ में सभी पदार्थों का पृथक् रूप से नाम तथा कर्मों का निर्माण वेद शब्द के द्वारा ही किया [मनु.–१।२१]उस प्रजापति ने सर्ग के आदिकाल में भूतों का जड़ चेतन पदार्थों का नाम रूप तथा कर्त्तव्य वस्तुओं देवादि लोकों का प्रवर्तन वेदशब्द के द्वारा ही किया । [वि० पु० १।५।६३] इत्यादि श्रुति स्मृति से जाना जाता है कि पदार्थ व्यक्ति रूप का जो निर्माण किया गया है वह वैदिक शब्द के द्वारा ही किया गय है । इस प्रकार से शब्द पूर्वक सर्ग को शास्त्र प्रतिपादित होने से वैदिक शब्द में कोई विरोध नहीं है । अर्थात् विग्रहवान् देवको होने पर भी विशिष्ट ऐश्वर्य के सम्बन्ध से जिस तरह कर्म यागादिक में किसी तरह कोई विरोध नहीं है । उसी प्रकार से नित्य वैदिक शब्द में भी किसी प्रकार का विरोध नहीं है । क्योंकि नित्य वैदिक शब्दों से जिनका वाच्य अर्थ विनश्वर भी है उन शब्दों से देवादि

अत एव च नित्यत्वम् ।१।३।२९।

वैदिकशब्देभ्यो नित्याकृतिं हृदि निधाय वेधास्तत्तदर्थांश्च संस्मरन् सृजतेऽत एव वेदस्य नित्यत्वमुपपद्यते । अत एव "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः" "वाचा विरूप

शब्देभ्य एव देवादिसृष्टिकरणाद्देवादिसृष्टिहेतुत्वेन तेषां सार्थक्याद्देवादीनां विग्रहवत्वेऽपि नवेदस्यानित्यत्वप्रयोजकः कश्चिच्छब्देऽपि विरोधः" (आनन्दभाष्यम् १।३।२८) अन्यथा नित्यता प्रतिपादकानेकश्रुतिस्मृति, अनुमानादि प्रमाणानामानर्थक्यमेव समुपपादितं स्यादिति दिक् ॥२८॥

विवरणम्–यस्मात् कारणात् वैदिकपुरन्दरवरुणादिशब्दद्वारा प्रजापतिरिन्द्रवरुणाकृतिं मनसि विचार्याकृतियुक्तां विग्रहादिविशिष्टानर्थान् सर्जयति सर्गादौ तस्मादेव कारणात् सर्जकस्य वेदस्यापि नित्यत्वमर्थत एव सिद्धं भवतीति दर्शयितुमाह "वैदिक शब्देभ्यः" इत्यादि । वैदिक शब्देभ्यो वैदिकपुरन्दरादिशब्दद्वारा वैदिकपुरन्दराद्याकृतिं तदनुगतारूप व्यक्ति का उत्पादन होता है इस बात को श्रुतिस्मृति प्रमाणो से सिद्ध किया गया है । वैदिक अर्थ में वैदिक शब्दो का ही प्रामाण्य है । तदितर प्रमाण अथवा तर्क उसमें प्रयोजक नहीं ॥२८॥

सारबोधिनी–जिससे वैदिक पुरन्दरादिक द्वारा पुरन्दर वरुणादि आकृति को प्रजापति ब्रह्मा मन में स्थिर करके और पुरन्दरादि व्यक्तियों का स्मरण करके इस सृष्टि को नवीन प्राय बनाते हैं उसी कारण से इन्द्रादि वाचक जो वैदिक शब्द हैं उनमें नित्यत्व सिद्ध होता है । अर्थात् ब्रह्मा जी सृष्टि के आदि में सम्प्रदाय के प्रवर्तक जो बादरायण व्यास बोधायन दधीची प्रभृति मन्त्रार्थ के द्रष्टा हैं उनकी आकृतियों का निश्चय करके तादृश शक्ति युक्त तदाकृति विशिष्ट तत्तत् ऋषि को उत्पन्न करके उनको तत्तत् कार्य में प्रवृत्त कराते हैं । वे ऋषि लोग भी स्वकीय कार्यानुकूल शक्ति को

नित्यया" [तै० सं० २।६।११।] इत्यादिश्रुतयः सङ्गच्छन्ते । एतदनुरोधेन "त्रयो वेदा अजायन्त" इत्यादिवाक्यानां प्रादुर्भावमात्रे तात्पर्यमित्यवगन्तव्यम् ॥२९॥

नर्थांश्च हृदि मनसिनिधाय संप्रधार्य्य मनसाविचार्येत्यर्थः । वेधाः प्रजापति ब्रह्मा सर्वानर्थान् पदार्थान् सृजते समुत्पादयति । अत एव तस्मादेव कारणात् वाच्यस्य नित्यत्वे वाचकस्यापि वेदस्यापि नित्यत्वमेव संसिद्धं भवतीति । यत एवं वेदस्य नित्यत्वम्. अतएव वक्ष्यमाणश्रुतिरप्यनुगृहीता भवति. 'अस्य महतो भूतस्ये'त्यादि ।' अस्य प्रत्यक्ष परिदृष्टस्य महतो भूतस्य सर्वशक्तिमतः परमेश्वरस्य निश्वासितम्. निःश्वास स्थानीयमेव ऋग्वेदो यजुर्वेदः सामवेदः शिक्षाकल्पश्छन्दो व्याकरणादि । एवम् "वाचा विरूपनित्ययावृष्णे सुष्ठुस्तुतिं चोदस्व" हे विरूप ! नित्यया अनादि निधनयावेदात्मिकयावाण्या सुष्ठु समीचीन रूपास्तुतिमाराध्य देवतायाः कुरुत इत्यर्थः । "अनादि

प्राप्त करके पूर्ववद् वेद को पढ़कर यथोचित कार्य को करते हैं । इसलिए वेद में नित्यत्व उपपन्न होता है । इस विषय को बतलाने के लिए उपक्रम करते हैं "वैदिक शब्देभ्यः" इत्यादि । वैदिक जो इन्द्र वरुणादिक शब्द हैं उनके द्वारा नित्य इन्द्रत्वादिक आवृत्ति को मन में थिर करके वेधा कमलासन ब्रह्माजी तादृश–तादृश शब्द प्रतिपाद्य अर्थ का अर्थात् व्यक्ति का जो कि पूर्वकल्प में रहनेवाला–उन सबको नवीनतम के समान समुत्पन्न करते हैं । इसलिए वेद में नित्यत्व की उपपत्ति होती है । वेद नित्य है, अतएव, "यह जो महान् भूत परमात्मा है उनके निःश्वास के समान ऋग्वेद, यजुर्वेद, सामवेद, शिक्षाकल्प, निरुक्त प्रभृतिक हैं । एवं" हे विरुप विलक्षण रूपवान्, नित्यवाणी वेदात्मक नित्य वचन से समीचीन रूप से मेरी स्तुति करो । इत्यादि श्रुतिस्मृति भी संगत होते हैं । अर्थात् यदि वेद नित्य हो तभी ""नित्यया वाचा" यह कथन संगत हो सकता है । जन्यता

निधनानित्यावागुत्सृष्टास्वयंभुवा । आदौवेदमयीनित्या यतः सर्वाः प्रवृत्तयः ।" इत्याद्यनेकाः श्रुतिस्मृतयो वैदिक शब्दानां नित्यत्वं प्रतिपादयन्त्यः समनुगृहीता भवन्ति । अन्यथा वेदस्यानित्यत्वस्वीकारे इमाः सर्वा अपि नावकाशा भवेयुरिति । निरवकाशश्च विधिर्बलीयान्भवतीतिशाब्दिकानां मर्यादा । न चैवं वेदस्य नित्यत्वे "त्रयोवेदा अजायन्त सामवेद आदित्याद् ऋग्वेदोऽग्नेर्यजुर्वेदोवायोः" इत्यादि वाक्यानां तथा "तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे ।" इत्यादीनां च का गतिः । उभयोर्वेदत्वे एकस्य गौणत्वमितरस्य च मुख्यत्वकल्पनमपि सर्वथैवायोग्यम्. उभयोरेव स्वप्रामाण्यं प्रतिनिरपेक्षत्वमिति वाच्यम्, प्रमाणै वेदस्य नित्यत्वेस्थिरीकृते सति यानीमानि जन्यताप्रतिपादकवाक्यानि तानि कल्पादौ संप्रदायप्रवर्तकानीति गृहाण । यानि तु अनुमानादीनि प्रमाणानि जन्यता प्रतिपादकानि वेदस्य तानि प्रदर्शितश्रुत्यादिबाधितत्वात्कालात्ययापदि-

पक्ष में ये सब वचन बाधित हो जायेंगे । एवम् "अनादिनिधनानित्यावागुत्सृष्टा स्वयंभुवा । आदौ वेदमयीनित्या यतः सर्वाः प्रवृत्तयः" अनादि निधना नित्य वाणीका उत्सर्जन सृष्टि के आदि में स्वयंभू ने किया । जिसने वाणियों के द्वारा सकल पदार्थों को उत्पत्ति हुई । इत्याद्यनेक स्मृतियों से भी वेद में नित्यत्व की सिद्धि होती है "त्रयो वेदा अजायन्त" इत्यादि । "प्रति मन्वन्तरं चैषा श्रुतिरन्याविधीयते" तीनो वेद उत्पन्न हुए । प्रत्येक मन्वन्तर में श्रुति अन्य-अन्य रूपा होती है । इत्यादि वचनों से तो वेदों में अनित्यता की ही सिद्धि होती है । तथा "वेदोऽनित्यः वाक्यत्वात् कालिदास वाक्यवत्" इत्यादि अनुमान से भी वेदों में अनित्य सिद्ध होता है । तथा प्रत्येक उच्चारण में शब्दभेद का प्रतिभास होने से वर्ण अनित्य तो तादृश शब्द राशि रूप से वेद भी तो अनित्य ही सिद्ध होता है । ऐसा कहना ठीक नहीं क्योंकि अनेक श्रुति स्मृतियों से जब वेद में नित्यत्व